# श्रीबन्धहेतुभङ्गप्रकरणम् ॥




कर्ता :

महोपाध्याय श्रीयशोविजयजी गणी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीनेमि-नन्दन ग्रन्थमाला-८

# श्रीबन्धहेतुभङ्गप्रकरणम् ॥

卐
卐卐
卐卐卐

प्रणेता :

न्या. न्या. महोपाध्याय श्रीयशोविजयजी गणी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

પ્રકાશક તથા પ્રાપ્તિસ્થાન :
**શ્રી યશોભદ્ર શુભંકર જ્ઞાનશાળા**
જૈન સોસાયટી
ગોધરા ( પંચમહાલ )

સંપાદક :
**પં. શીલચન્દ્રવિજય ગણિ**

મુદ્રક :
**ધરણેન્દ્ર એચ. કાપડિયા**
ધરણીધર પ્રિન્ટર્સ,
૪૨, ભદ્રેશ્વર સોસાયટી, ગ્રાઉન્ડ ફ્લોર,
દિલ્હી દરવાજા બહાર, અમદાવાદ.

આવરણ ચિત્ર :
**શ્રી દિવ્યરાજ રાણા**
અમદાવાદ

પ્રથમ આવૃત્તિ :
સં. ૨૦૪૩, સને. ૧૯૮૭

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## દ્રવ્ય સહાયઃ

આ લઘુ ગ્રંથના મુદ્રણમાં પ. પૂ. સાધ્વી શ્રીવિદ્યુત્પ્રભાશ્રીજી તથા સાધ્વી શ્રીશશીપ્રભાશ્રીજી મહારાજ (મહુવાવાળાં) ના સદુપદેશથી મહુવાવાળાં શ્રીમતી ચંપાબેન રમણીકલાલ શાહે (અમદાવાદ) દ્રવ્યસહાય કરી શ્રુતજ્ઞાનની તેમજ પ. પૂ. મહોપાધ્યાયજી મહારાજની ઉત્તમ ભક્તિ કરી છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमोनमः श्रीगुरुनेमिसूरये ॥

# ભૂમિકા

ऐँकार એ મહામહોપાધ્યાય શ્રીયશોવિજયજી મહારાજની ઓળખ છે, કહો કે મુદ્રાલેખ છે. ऐँ થી શરૂ થતી રચના હોય તો વગર વિચાર્યે કહી શકાય કે તે ઉપાધ્યાયજીની જ રચના હશે. આ '**बन्धहेतुभङ्गप्रकरण**'ના મંગલ-શ્લોકનો આરંભ પણ **ऐँ** (**ऐँन्द्र**) થી જ થયો છે, જે આ ગ્રન્થ ઉપાધ્યાયજી-કૃત હોવાનું સબળ પ્રમાણ બની રહે છે.

**बन्धहेतुभङ्गप्रकरण - ગત વિષયનું સંક્ષિપ્ત દર્શન :**

ગ્રન્થના આરંભે મંગલ-પદ્યમાં કર્તા બન્ધહેતુભંગ-કથન કરવાની પ્રતિજ્ઞા રજૂ કરે છે. તે પછી મિથ્યાત્વ, અવિરતિ, કષાય અને યોગ-એ ૪ કર્મબંધનાં કારણો છે એમ જણાવી, ક્રમશઃ તે ચારેયની વ્યાખ્યાઓ તથા તેના પાંચ, બાર, પચીશ (૧૬ + ૯), પંદર એમ ૫૭ પેટાપ્રકારો (ઉત્તર ભેદો) તેનાં લક્ષણો સાથે આપે છે.

ત્યારબાદ સત્યાસત્ય મનોયોગનો વિચાર છે. તે આમ તો પ્રાચીન સૂરિઓના વિચારોનો જ અનુવાદ છે, છતાં તેમાં એક વાક્યમાં ઉપાધ્યાયજી મહારાજની મૌલિકતા અને વિચારક પ્રતિભાનો ઉન્મેષ પ્રગટી આવ્યો છે. અશોકબહુલ વન માટે '**अशोकवनमेवेदं**' એ વ્યવહારૂ પ્રયોગને પરંપરાગત રીતિએ ભાવસત્ય ઠરાવ્યા બાદ તરત તેમણે ઉમેર્યું છે : **उत्पन्न मिश्रादिवचनं तु सङ्ख्याशब्दानां पर्याप्त्याऽन्वयबोध एव साकाङ्क्षत्वादसत्यमेव ॥**"

ભાષાના સત્ય, અસત્ય, સત્યામૃષા અને અસત્યામૃષા એવા ચાર પ્રકારોમાંના ત્રીજા સત્યામૃષા (મિશ્ર) ભાષાપ્રકારના ઉત્પન્ન આદિ ૧૦ પેટાપ્રકારો આપણાં શાસ્ત્રોમાં વર્ણવાયા છે. શ્રીદશવૈકાલિક સૂત્ર-ચૂર્ણિમાં (સાતમા વાક્યશુદ્ધિ અધ્યયનની પીઠિકા) "[1]**इदाणिं सच्चामोसा भण्णइ, किंचि तीए सच्चं किंचि मोसंति ।**

---

૧. **दशवैकालिक सूत्र-चूर्णि पृ. २३७; ऋ. के. पेढी, रतलाम** દ્વારા **वि. सं. १९८९** માં પ્રકાશિત.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सा इमा दसविधा, तं० उप्पन्नविगयमीसग० ॥ २७७ ॥ गाथा। उप्पण्णमीसिया.. । तत्थ उप्पन्नमीसिया जहा कोइ मणेज्ज एयंमि नगरे दस दारगा जाता, तत्थ कदाइ ऊणा अधिगा वा होज्जा, एवमादि उप्पण्णमीसिया ।** " – આમ વિગતે વર્ણન છે.

આ ઉત્પન્નમિશ્ર વગેરે પ્રકારનાં વચનોને કેવાં ગણવાં? સત્ય કે અસત્ય? આવો પ્રશ્ન ઉપાધ્યાયજી મહારાજ સમક્ષ આવ્યો, અને તેના જવાબમાં, નવ્ય ન્યાયની શૈલીમાં, નિશ્ચયનયની દૃષ્ટિએ, તેમણે આ વાક્ય આપ્યું છે, જે તર્કસંગત ઉત્તરની અપેક્ષા રાખતા જિજ્ઞાસુ માટે પ્રતીતિકર બની રહે છે.

એ પછી સંક્ષેપમાં ચાર મૂલ બંધહેતુઓની ગુણ ઠાણાંઓમાં યોજના દર્શાવીને, વિસ્તારથી અને ક્રમશઃ, તમામ ગુણઠાણાંઓમાં, ક્યાં કેટલા અને કયા કયા બંધહેતુઓ સંભવે, અને તેમાં પણ ઓછામાં ઓછાથી લઈને વધુમાં વધુ કેટલા બંધહેતુઓ જે તે ગુણઠાણે હોઈ શકે, તેનું સ્વરૂપ તથા તેના ભાંગાઓની સંખ્યા, તે ભાંગા ઉપજાવવાની રીત સાથે દર્શાવવામાં આવી છે.

એ પછી બીજા તબક્કામાં કર્તા, ૧૪ જીવસ્થાનકોમાં બંધહેતુઓની યોજના નિરૂપે છે. તેમાં સંજ્ઞીપંચેંદ્રિયપર્યાપ્ત–જીવસ્થાનકમાં બંધહેતુ–ભંગનું નિરૂપણ, ગુણસ્થાનોમાં બંધહેતુભંગ –નિરૂપણ કર્યું તેમાં જ આવી ગયું એવો અતિદેશ કરીને પછી સમ્યગ્દૃષ્ટિ, સાસ્વાદન તથા મિથ્યાદૃષ્ટિ એ ત્રણ ભેદવાળા અપર્યાપ્ત સંજ્ઞીના બંધહેતુભંગો જણાવ્યા છે. અહીં, સંજ્ઞીઅપર્યાપ્ત સમ્યગ્દૃષ્ટિના ભાંગા માટેની અંકસ્થાપના છે ત્યાં, "**वेदत्रयेण योगा गुण्यन्ते जाताः पञ्चदश, तेभ्यः 'चत्तारि अविरए चय' इत्यादिवचनप्रामाण्याच्चत्वारि रूपाण्यपनीयन्ते, जाता एकादश । (मलयगिरीय पञ्चसङ्ग्रह-टीका, पृ. १८२ )** " એટલો વાક્યખંડ જો હોત તો, ૪૪૦ ભાંગાનો તાળો મેળવવાનું સરળ પડી જાત. અહીં અજાણ જિજ્ઞાસુ જ્યારે અંકાભ્યાસ કરે ત્યારે ૬૦૦ નો જ આંક આવશે. પરંતુ તેણે ઉપરનો વાક્યખંડ ધ્યાનમાં લઈને જ ગણતરી કરવાની છે.

આ પછી અસંજ્ઞી પંચેંદ્રિય અપર્યાપ્તાના તથા પર્યાપ્તાના, તેમજ ચતુરિંદ્રિયના, ત્રીંદ્રિયના, દ્વીંદ્રિયના પર્યાપ્ત–અપર્યાપ્ત એમ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

બે બે ભેદોના, અને બાદર તથા સૂક્ષ્મ એકેંદ્રિયના પર્યાપ્ત–અપર્યાપ્ત એમ બે બે ભેદોના, ત્યાં ત્યાં ઘટતાં ગુણસ્થાનકો તથા ત્યાં ઉપજતા બંધહેતુભંગો વર્ણવ્યા છે. તેમાં પર્યાપ્ત બાદર એકેંદ્રિયના ભાંગાની પ્રરૂપણા વખતે ઔદારિક, વૈક્રિય અને વૈક્રિયમિશ્ર– એમ ત્રણ યોગ સમજવાના છે, તે કર્તાએ નોંધ્યું નથી. જોકે તેની પૂર્વના જીવસ્થાનકમાં પણ ત્રણ યોગ હતા અને એ જ રીતે અહીં પણ ત્રણ જ છે, તેથી ભંગસંખ્યામાં ફરક પડવાનો સવાલ નથી; આમ છતાં, યોગો અપર્યાપ્તાના ત્રણ તે જુદા ને પર્યાપ્તાના ત્રણ તે જુદા– એ ખ્યાલ અભ્યાસીને રહેવો જરૂરી છે.

જીવસ્થાનોમાં બંધહેતુભંગના નિરૂપણની પૂર્ણાહુતિ થવાની સાથે જ આ કૃતિનો પહેલો વિભાગ સમાપ્ત થાય છે.

આ પછી શરૂ થાય છે બીજો વિભાગ. આ વિભાગ આર્યા–પદ્ય–બદ્ધ છે. આ વિભાગમાં કેટલીક ખાસ કર્મપ્રકૃતિઓના બંધના વિશિષ્ટ બંધહેતુઓનું અન્વય–વ્યતિરેકદૃષ્ટિએ પ્રતિપાદન થયું છે. સામાન્યતઃ તો નિયમ છે કે યોગ તે કર્મના પ્રકૃતિબંધ અને પ્રદેશબંધનું કારણ છે, અને સ્થિતિબંધ તથા રસબંધના હેતુ કષાયો છે. એ નિયમને પ્રથમ શ્લોકમાં નિર્દેશીને, પછીનાં પાંચ પદ્યોમાં વિશિષ્ટ પ્રકૃતિના વિશિષ્ટ હેતુઓ અન્વય–વ્યતિરેકથી કેવી રીતે સંભવે છે, તેનું નિરૂપણ શરૂ થાય છે. તેમાં ૧૬ પ્રકૃતિ મિથ્યાત્વનિમિત્તે, ૩૫ પ્રકૃતિ અસંયમ (અવિરતિ) નિમિત્તે, શેષ ૬૮ પ્રકૃતિઓ કષાયનિમિત્તે અને એક શાતાવેદનીય યોગનિમિત્તે બંધાતી હોવાનું ઠરાવ્યું છે.

સાતમા શ્લોકમાં ઉપાધ્યાયજી મહારાજ એક મજાનો પ્રશ્ન ઊભો કરે છે : “ અન્યત્ર સાતવેદનીયાદિ–કર્મપ્રકૃતિઓનો બંધ, મિથ્યાત્વાદિ ચારે હેતુઓથી થતો હોવાનું કહ્યું છે, ને અહીં તો ફક્ત યોગપ્રત્યયે જ બંધ થાય એમ જણાવ્યું છે; તો એમાં તથ્ય શું ? ” અને આ પ્રશ્નનો મૌલિક જવાબ પણ, એ જ શ્લોકના ઉત્તરાર્ધમાં, પોતે જ આપી દે છે : “ **सा तु तृणारणिमणिवद् विकल्पमाश्रित्य बोद्धव्या ॥** ” અહીં ઉપાધ્યાયજી મહારાજે “ તૃણારણિમણિન્યાય ” ને સંભાર્યો છે. આ ન્યાય એમ કહે છે કે— “**तार्णवह्निं प्रति तृणस्य, आरणवह्निं प्रत्यरणेः, मणिजन्य–**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वह्निं प्रति मणेश्च कारणत्वम्। न तु वह्नित्वावच्छिन्नं प्रति तृणादेः कारणत्वं, परस्पर व्यभिचारात्। एवं यत्र कार्यकारणभाव-बाहुल्यं, कार्यतावच्छेदकं च नाना, तत्रास्य प्रवृत्तिः॥ (भुवनेश लौकिक-न्यायसाहस्री-( सं. १९६५, मुंबई पृ. १४६-४७ )"** આનો ભાવ આમ તો સ્પષ્ટ છે, છતાં પ્રસ્તુત સંદર્ભમાં આનો ભાવ એવો બેસે છે કે, ક્યાંય તૃણ-તણખલાંને સળગાવીને તેનો અગ્નિ પેદા કરાય, ત્યાં અરણિકાષ્ઠ દ્વારા પણ અગ્નિ પ્રગટાવવામાં આવે, અને ત્યાં જ ઉત્તેજક ( સૂર્યકાંત ) મણિજન્ય અગ્નિ પણ ઉદ્ભવે; આ સંજોગોમાં ત્યાં ત્રણ જાતના અગ્નિ થયા અને તે ત્રણેનાં કારણો પણ અલગઅલગ-ત્રણ થયાં; એમાંનું એકે કારણ અન્ય અગ્નિનું કારણ ગણાય કે બને નહિ. આમ છતાં, ત્યાં થોડી વારમાં જ તૃણજનિત અગ્નિ હોલવાઈ જાય, ને અરણિકાષ્ઠનો અગ્નિ પણ બૂઝાય, ત્યારે પણ જો ત્યાં પેલો મણિ હોય, તો તજ્જનિત અગ્નિ તો રહે જ છે; જો મણિને પણ ત્યાંથી ખસેડી લેવાય, તો ત્યાં અગ્નિનો તદ્દન અભાવ પ્રવર્તી શકે ખરો. આથી સ્પષ્ટ થાય છે કે ત્યાં પ્રગટેલા ત્રણે અગ્નિનાં કારણો અલગ અલગ-ત્રણ હોવા છતાં, અન્ય કારણોની નાબૂદી પછી પણ ત્યાં પ્રવર્તતા અગ્નિનું કારણ મણિ જ છે, અને તે અગ્નિનું અન્વય-વ્યતિરેકી કારણ એ જગ્યાએ ઠરે છે.

આ જ પ્રકારે સાતવેદનીયના બંધ અંગે પણ વિચારીએ તો, ૧. જ્યાં કર્મના ચારેચાર બંધહેતુઓ મોજૂદ હોય ત્યાં સાતવેદનીયના બંધમાં તે ચારે કારણ બને; ૨. જ્યાં ત્રણ બંધહેતુ હોય ત્યાં તે ત્રણ કારણરૂપ બને; ૩. જ્યાં બે બંધહેતુ રહે ત્યાં તે બે કારણ બને; ૪. અને જ્યાં-જ્યારે અન્ય ત્રણ હેતુઓ ન રહે ને માત્ર યોગ જ રહી જાય, ત્યારે ફક્ત તે-યોગ જ સાતવેદનીય-બંધમાં કારણ બને. અહીં તર્કની દૃષ્ટિએ વિચારીએ તો ૪, ૩, ૨ કે ૧ બંધહેતુઓને લીધે જ્યારે જ્યારે સાતવેદનીય બંધાતું રહ્યું ત્યારે ત્યારે ત્યાં સર્વત્ર 'યોગ' ની ઉપસ્થિતિ તો રહી જ; બીજી રીતે, બીજાં બધાં કારણો દૂર થતાં ગયાં ત્યારે પણ છેવટે તો યોગ જ રહે છે, ને તે રહે ત્યારે તે બંધાય છે, પણ તે પણ નહિ રહે ત્યારે તે નહિ બંધાય. આ અપેક્ષાએ વિચારતાં સાતવેદનીયના બંધનો અવ્યભિચારી અને અન્વય-વ્યતિરેકી હેતુ ફક્ત યોગ જ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

સંભવે છે, માટે ઉપાધ્યાયજી મહારાજે **योगैस्तु सातवेद्यं** એમ કહ્યું જણાય છે. અને છતાં, પોતાની આ વાતને પૂર્વાચાર્યોના કથનથી વિપરીત કોઈ કહી દે તે અગાઉ જ, તેઓ સ્વયં **तृणारणि-मणिन्याय** ને ટાંકીને પૂર્વાચાર્યોની વાત સાથે પોતાના વિધાનની સંગાત અને સાપેક્ષતા છતી કરી આપે છે. આ પ્રશ્નની આ રીતની ચર્ચા પંચસંગ્રહની વૃત્તિઓમાં જોવા મળી નથી, તે નોંધવું જોઇએ. (અન્યત્ર ક્યાંય હોય તો ખબર નથી).

૮ થી ૧૪ આર્યાઓમાં એક બીજો સવાલ ઊભો કર્યો છે. તીર્થંકર નામકર્મના બંધમાં સમ્યક્ત્વ અને આહારકદ્વિકના બંધમાં સંયમ હેતુ છે એ વાતમાં કોઈ કે આપત્તિ ઊભી કરી છે કે સમ્યક્ત્વના ત્રણ મુખ્ય ભેદો પૈકી, જો ઔપશમિક સમ્યક્ત્વ જિનનામ–બંધહેતુ હોય તો, ૧૧મે ગુણઠાણે પણ તે બંધાવું જોઈએ; ક્ષાયિક સમ્યક્ત્વ જો બંધહેતુ હોય તો સિદ્ધ ભગવાનને પણ જિનનામ બંધાવું જોઈએ; ને ક્ષાયોપશમિક સમ્યક્ત્વ જો બંધનું કારણ હોય, તો આઠમા ગુણઠાણાના પહેલા જ ભાગે જિનનામનો બંધ-વિચ્છેદ થઈ જવો જોઈએ. જ્યારે તમે તો ક્ષયોપશમ સમ્યક્ત્વનો વિચ્છેદ આઠમાના પ્રથમ ભાગે માનો છો, ને જિનનામનો બંધ-વિચ્છેદ આઠમાના છઠ્ઠા ભાગે થવાનું સ્વીકારો છો, અને એ, ઉપર કહ્યું તેમ, બરાબર નથી. સાર એ કે સમ્યક્ત્વ–કોઈ પણ જાતનું-જિનનામના બંધનું કારણ બની શકે નહિ. એ જ રીતે સંયમ પણ આહારકદ્વિકના બંધનું કારણ નહિ બની શકે. કેમકે જો સામાન્યતઃ સંયમ જ તેના બંધમાં કારણ હોય તો છટ્ઠે ગુણઠાણે પણ તેનો બંધ થવો જોઈએ, અને અપ્રમત્ત સંયમ તો છે, ત્યાં પણ આહારકદ્વિક બંધાવું જોઈએ. તેમ થતું તો નથી.

આ જિજ્ઞાસાનું સમાધાન કરતાં કર્તા ૧૪મા પદ્યમાં સમજાવે છે કે ભાઈ, આ ત્રણ પ્રકૃતિના પણ ખરા બંધહેતુઓ તો કષાય છે, અર્થાત્ કષાયવિશેષો જ છે. સમ્યક્ત્વ ને સંયમ તો માત્ર તેમાં સહકારી કારણરૂપે જ ભાગ ભજવે છે. અને આ કષાયવિશેષો ક્રમશઃ ચોથા અને સાતમા ગુણસ્થાનકથી લઈને અપૂર્વકરણના છઠ્ઠા ભાગથી પૂર્વલી કે છઠ્ઠા ભાગ સુધીની જ સ્થિતિમાં વર્તે છે, એટલે તેટલા ગાળામાં યથાયોગ્યપણે આ ત્રણ કર્મો બંધાઈ શકે છે, અન્યત્ર કે અન્યથા નહિ. આ જ વાતને વિશદ કરતાં ૧૭ મા

Jain Education International For Private & Personal Use Only www.jainelibrary.org

પદ્યમાં કહે છે કે, એ કષાયવિશેષો સમ્યક્ત્વાનુગત બનીને, સકલ જગતનો ઉદ્ધાર કરવાની વાસનાથી વાસિત બન્યા થકા પ્રશસ્ત બને, અને તેથી તે જિનનામ-બંધમાં કારણરૂપ બની જાય.

આ પછી ૧૮ થી ૨૨ ગાથાઓમાં જિનનામ કોણ / ક્યારે બાંધે તેનું, તથા ગણધર અને મુંડકેવળી કોણ બને, કેવી ભાવનાથી બને, તેનું સ્વરૂપ નિરૂપ્યું છે.

આ બધું શંકા-સમાધાન-નિરૂપણ તો પંચસંગ્રહ-વૃત્તિમાં પણ મળે છે. પરંતુ ૨૩ મી આર્યામાં ઉપાધ્યાયજી મહારાજ નવી જ વાત લાવ્યા છે, ને એ આ : – "પ્રણિધિ, પ્રવૃત્તિ, વિઘ્નજય, સિદ્ધિ અને વિનિયોગ એ પાંચેય આશયોની શુદ્ધિના માધ્યમથી ચારિત્રની શુધ્ધતા સાધવા દ્વારા થયેલા એટલે કે શુધ્ધ કે પ્રશસ્ત બનેલા કષાયવિશેષો આહારકદ્વિકના બંધમાં કારણ બને છે.

આ પછી વધુ એકવાર ઉપાધ્યાયજીની નયવિવેકદૃષ્ટિનો ચમકારો આવે છે. ૨૪ મા પદ્યમાં સવાલ આવ્યો કે ભલા, સમ્યક્ત્વ અને સંયમ પણ જો કષાયસહગત હોય તો જ જિનનામાદિના બંધમાં હેતુ બને, એકલાં-સ્વતંત્રરૂપે ન બની શકે, તો એ બન્ને ગુણોએ શો અપરાધ કર્યો કે એમને સ્વતંત્ર કારણ બનવાની સ્વતંત્રતા નથી મળતી ?

આનો જવાબ વાળતાં ૨૫ મા પદ્યમાં ઉપાધ્યાયજી મહારાજ કહી દે છે કે ભાઈ, નિશ્ચયનય-દૃષ્ટિએ જોઈએ તો સમ્યક્ત્વ ને સંયમ કદી બંધનાં હેતુ બની જ ન શકે; એ બે તો મોક્ષનાં હેતુ છે ! ને તેથી જ જિનનામ-આહારકદ્વિકના બંધહેતુલેખે કષાયોને મૂક્યા છે, આ બેને નહિ. ( મોક્ષના હેતુ હોય તે બંધના હેતુ કેવી રીતે બને ? ) અને છતાં સામાન્યતઃ સમ્યક્ત્વને જિનનામના અને સંયમને આહારકદ્વિકના બંધમાં કારણ તો મનાય છે તેનું શું ? આનો ખુલાસો આપતાં જણાવ્યું કે એ તો વ્યવહારનય-દૃષ્ટિએ સમજવું જોઈએ. જેમ, બાળે છે અગ્નિ, છતાં કોઈ કહે કે ઘી બાળે છે, તો તે વ્યવહારૂ-ઔપચારિક પ્રયોગ ગણાય, તેવું અહીં આ બેના સંબંધમાં પણ સમજવું જોઈએ; અલબત્ત, આ દૃષ્ટિ શુદ્ધનયાનુગૃહીત વ્યવહારનયની છે. અને આ નય તો આ ત્રણ પ્રકૃતિઓનો બંધ કરાવી દેવો. એ સમ્યક્ત્વ અને સંયમનો અતિશય છે, એમ સમજે છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

એમ જુદી જુદી–પરસ્પર વિરુદ્ધ વાત આવતાં જ મૂંઝવણ સર્જાઈ: એકવાર કહેવું કે બંધનું કારણ ન બની શકે; કેમ કે મોક્ષનું કારણ છે, ને પછી તરત જ કહેવું કે આ ત્રણ કર્મોના બંધ હેતુ બનવું એ સમ્યક્ત્વ ને સંયમની વિશેષતા છે; આ કેવી અસંગત વાત છે!

આનું સરસ સમાધાન આપતાં *ઉપાધ્યાયજી મહારાજ* કહે છે કે નયના ભેદે વિધાનભેદ થવો, એ કોઈ દોષ નથી. એક જ વિધાનને જુદા જુદા નયોની નજરે જોઈએ, તો તેમાં જુદી જુદી નયાપેક્ષાએ જુદા જુદા અર્થો નીકળી શકે છે; તેથી એને દોષ ન કહેવાય. આ વાતના સમર્થનમાં ઉપાધ્યાયજી મહારાજ મજાનો દાખલો આપે છે: શ્રી પાર્શ્વનાથ પ્રભુના સ્થવિરોને–સંતાનીય શિષ્યોને ધર્મસ્વરૂપ પૂછતાં તેમણે ચાતુર્યામ વગેરે પ્રકારના જુદા ધર્મનું પ્રતિપાદન કર્યું હોય (ને મહાવીર પ્રભુના માર્ગના સ્થવિરો પંચયામ પ્રકારના સપ્રતિક્રમણ ધર્મનું પ્રરૂપણ કરશે), તો તેથી જેમ વ્યામોહ કરવાનો નથી; બલ્કે અપેક્ષાભેદે એ પણ મોક્ષમાર્ગ જ છે એમ સમજીએ છીએ, તે જ પ્રકારે અહીં પણ નયભેદે નિરૂપણભેદ થાય તેમાં વ્યામોહ કરવાનો નથી. (“ **पार्श्वापत्यस्थविरप्रतिवचनानां विभेद इव** ” એ વાક્યનો અહીં કરેલો અર્થ અયોગ્ય હોય તો તજજ્ઞો સાચા અર્થ પ્રત્યે ધ્યાન દોરે એવી વિજ્ઞપ્તિ છે.)

૨૯ મી કારિકામાં વળી તદ્દન નવી–જુદી જ વાત આવે છે. એમાં કહ્યું કે કેટલાક આચાર્યોના અભિપ્રાય પ્રમાણે તો યોગમાં જ તરતમભાવને કારણે કાંઈક વિશેષતા આવે છે, જેને લીધે જિનનામકર્માદિ પ્રકૃતિઓ બંધાય છે. અને એ યોગવિશેષને લીધે આ કર્મો બંધાવારૂપ ફળવિશેષ પ્રાપ્ત થતું હોવાથી જ યોગમાં તજ્જનક તારતમ્ય કે વિશેષતા હોવાનું સિદ્ધ થાય છે.

આ ૨૯ મી કારિકામાં ચોથા ચરણમાં “ **न वचनोपग्रहस्तत्र** ” એમ મૂળ આદર્શમાં વાંચવા મળે છે. અહીં એક માત્રા (અક્ષર) ખૂટતી હોવાથી **हि** અવ્યય ઉમેર્યો તો છે, પરંતુ તે સ્થાને **न हि** ને બદલે **ननु** હોય તો વધુ ઉચિત ને મનોરમ લાગે છે, ને અર્થધ્વનિને પકડવા માટે પણ **ननु** વિશેષ અગત્યનો જણાય છે. આથી **हि** ( ) માં મૂકયા પછી પ્રશ્નચિહ્ન મૂક્યું છે; નિર્ણય થઈ શકયો નથી. વસ્તુતઃ આ કારિકાનો વિશદ અર્થ હજી સમજવો જરૂરી લાગે છે. ઉપાધ્યાય-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

જી મહારાજની, એમના મનમાં રમતા અસંખ્ય સંદર્ભોનું અનુસંધાન લઇને ઊગેલી પંક્તિને, 'આનો અર્થ આમ જ છે' એ રીતે ગમે ત્યાં જોતરવી, તે પણ યોગ્ય નથી.

૨૯ કારિકાઓરૂપ, આ ગ્રંથનો, બીજો વિભાગ અહીં પૂર્ણ થાય છે. અને એ સાથે જ બંધહેતુઓનું નિરૂપણ પણ પૂરું થાય છે. મૂલ આદર્શમાં છેલ્લી કારિકા ને ૩૦ એમ આંક આપ્યો છે, પણ તે લેખક દોષ છે. વાસ્તવમાં ૧ થી ૨૯ કારિકાઓ જ છે. ઉદ્ધરણાત્મક ગાથાઓને અંક આપ્યા જ નથી, તે પણ નોંધવું ઉચિત છે.

આ પછી શરૂ થાય છે ત્રીજો વિભાગ. આમાં ૧ થી ૪૩ કારિકાઓ આર્યાનિબદ્ધ છે. એમાં, બાંધેલાં કર્મોનો ઉદય સાધુને પરીષહરૂપે થતો હોઈ, ૨૨ પરીષહોનું સ્વરૂપનિરૂપણ છે. દરેક પરીષહનું સ્વરૂપ, તેનાં કારણો, તેને સહન કરવાની રીતિ તથા કયો પરીષહ કયા કર્મમાં અન્તર્ગત–વગેરે સ્વરૂપ આ શ્લોકોમાં નિરૂપવામાં આવ્યું છે. આ સંપૂર્ણ વર્ણન પંચસંગ્રહ–વૃત્તિને અનુસરતું છે.

આ પછી ત્રીજો વિભાગ તેમજ ગ્રંથ પણ પૂર્ણ થાય છે. આ ગ્રંથના સમગ્ર વિષયના જિજ્ઞાસુએ પંચસંગ્રહના બન્ધહેતુદ્વારની વૃત્તિનું અવલોકન કરવું જોઇએ.

**અશુદ્ધિ સંશોધન વિશે —**

આ લઘુગ્રન્થના ઉપલબ્ધ એકમાત્ર પ્રસ્તુત આદર્શમાં અશુદ્ધિઓ પાર વિનાની છે. ઠેર ઠેર–ડગલે ડગલે અશુદ્ધિઓ જોવા મળે છે. અહીં તૈયાર કરવામાં આવેલી વાચનામાં અક્ષરોની કે શાબ્દિક ગણાય તેવી અશુદ્ધિઓ મહદંશે સુધારીને જ મૂકી છે. બધી અશુદ્ધિઓ લખીને ( ) માં શુદ્ધ મૂકવા જઇએ તો પુસ્તક વાંચવું એ પણ કંટાળો ઉપજાવનાર બની રહે, તેથી જ આમ કરવું ઉચિત ધાર્યું છે. આમ છતાં, જ્યાં જ્યાં મહત્ત્વની અશુદ્ધિઓ હતી, ત્યાં પહેલાં મૂળ અશુદ્ધ પાઠ મૂકીને પછી ( ) માં પાઠ આપ્યો છે. દા.ત. પૃ. ૯ માં "**न्येकविंशति ( ? न्येकनवति )**", તથા પૃ. ૨૧ માં "**सुखगती ( ? शुभखगति )**" વગેરે.

પૃ. ૬ માં ચોથી પંક્તિમાં [ ] માં કરેલો ઉમેરો યથામતિ કર્યો છે. તેની યથાર્થતાનો નિર્ણય તજ્જ્ઞો કરે. પૃ. ૧૧ માં ૧૫–૧૬ પંક્તિગત →← ચિહ્નાન્તર્ગત પાઠ આદર્શમાં ન હતો. ભાંગા ગણતાં ખ્યાલ આવવાથી એ બે પંક્તિઓ ત્યાં બ્રેકેટમાં ઉમેરી છે. પૃ. ૧૪ માં પણ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

એ જ રીતે ૨૪-૨૫-૨૬ મી પંક્તિઓગત [ ] ચિહ્નાન્તર્ગત પાઠ નવો ઉમેર્યો છે. પૃ. ૨૧ માં છેલ્લેથી પહેલી પંક્તિમાં પણ ચોથી કારિકાના બીજા ચરણનો ખંડિત અંશ ઉમેરવાનો થયો છે. પૃ. ૧૭ માં અંકસ્થાપનામાં પણ ખૂટતો અંક બ્રેકેટમાં મૂકયો છે.

પૃ. ૩ માં પંક્તિ ૬-૭ માં, આદર્શ પ્રતિમાં આવો પાઠ મેં વાંચ્યો: "**भावसत्यमेव वोत्यत्र मिश्रादिवचन**०" ઇત્યાદિ.સંશોધનનો અનુભવ નહિ. '**सिद्धस्य गतिश्चिन्तनीया**'એ ન્યાયને અનુસરવાની ટેવ વગેરે કારણે મેં અહીં **वोत्यत्र** ને અશુદ્ધ માનીને ત્યાં **वाऽन्यत्र** હોઇ શકે તેવી કલ્પના કરી. એ જ રીતે પૃ. ૨૨ માં ૭ મી કારિકાના પ્રથમ ચરણમાં "**चतुरादिप्रत्ययती**" આમ પાઠ આદર્શ પ્રતિમાં હતો. મેં તેને સુધાર્યો : "**चतुरादिप्रत्ययती** (तः)"

પરંતુ આ બે સ્થાનો, બીજા સંદર્ભમાં જ, પૂજ્યપાદ મુનિરાજ શ્રી જંબૂવિજયજી મહારાજને દેખાડયા, ત્યારે તેમની તીવ્રતમ મેધા-શક્તિનો ચમકારો મેં અનુભવ્યો. તેમણે ઉપરોક્ત બન્ને સ્થળ માટે ઊહાપોહ કરીને મને સૂચવ્યું: '**वोत्यत्र**' છે ત્યા '**वोत्पन्न**' વાંચવું ઠીક લાગે છે. દશવૈકાલિકમાં પ્રાય: "ઉત્પન્ન મિશ્ર" આદિ પ્રકારો અને તેનાં "**दश दारका जाताः**" એવાં ઉદાહરણો છે, તે સાથે સંબંધ સંભવે છે. અને ૭ મી કારિકામાં "**चतुरादिप्रत्ययता**" વાંચવું જોઇએ. એથી અર્થ પણ સંગત થાય છે અને ત્યાં પ્રયોજાયેલ સ્ત્રીલિંગ પણ સુસંગત થાય છે. લેખકના દોષથી **ती-ता** કે **त्र-न्न** કે **त्प-त्य** બધાં અક્ષરો સમાન લખાય છે, તેથી આવું બને.

મૂળ હસ્તપ્રતિ સામે નહિ; માત્ર મારો લખેલો ઉતારો જ સામે હતો; અને આનો બીજો કોઈ સંદર્ભ પણ ન હતો, છતાં પૂજ્ય શ્રી જંબૂવિજયજી મહારાજે આ સુધારા સૂચવ્યા, તે વાત તેમના અનુભવના ઉંડાણની તથા વિશાળ અવગાહન અને તે બધાં દ્વારા સિદ્ધ થયેલી વિલક્ષણ પ્રજ્ઞાની સૂચક છે. આ રીતે પ્રસ્તુત લઘુ ગ્રંથને તેમની દૃષ્ટિનો લાભ પણ મળ્યો છે.

આ પ્રતિ પૂજ્ય મુનિરાજ શ્રી પુણ્યવિજયજી મહારાજના હાથમાં ને તેમની નજર તળે ફરી ગઈ હોવાથી, પ્રતિમાં કયાંક કયાંક તેમણે ઇન્ડીપેનથી શુદ્ધિ કરી છે. દા.ત. પૃ.૧૭ પરની પંચસંગ્રહની ગાથામાં, મૂલ આદર્શમાં '**ठाण**' શબ્દ લખવો રહી ગયો છે, તે ત્યા માર્જિનમાં તેમણે નોંધ્યો છે. અન્ય પણ બે એક સ્થળે ભૂલ શોધેલી છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

મિશ્ર ગુણસ્થાનકમાં બંધહેતુની વિચારણા ચાલી, ત્યારે એમાં આરંભમાં જ અંકસ્થાપના કરી છે, એ અંકો મૂળ પ્રતિમાં ૧૦ ૪ ૩ ૨ ૫ ૬ એમ પંક્તિબદ્ધ નથી, પરંતુ–

૧૦
૪
૩
૨
૫
૬

આમ ઊભી લીટીમાં છે. તેથી એ પૃષ્ઠની–લખાણની ચાર પંક્તિઓ માં, લખાણમાં ભંગ પાડે તે રીતે આ અંકો લેખકે લખ્યા છે. આવું જ પૃ. ૧૭ માં આવતી અંકસ્થાપનાનું પણ સમજવું.

**આ ગ્રંથની શોધનો ઈતિહાસ–**

પ્રસ્તુત **बन्धहेतुभङ्गप्रकरण** એ મહોપાધ્યાય શ્રી યશોવિજયજી મહારાજની કૃતિ છે, એવું શોધવાનો અને સિદ્ધ કરવાનો સૌ પ્રથમ યશ પ. પૂ. આગમપ્રભાકર મુનિરાજ શ્રી પુણ્યવિજયજી મહારાજને ફાળે જાય છે, એ અહીં સહર્ષ નોંધવું જોઈએ. ઘણું કરીને વિ.સં. ૨૦૨૧–૨૨ માં, ખંભાતના શ્રી વિજયનેમિસૂરિ જ્ઞાનશાળાના ગ્રંથભંડારમાંની અપ્રગટ કે વિરલ એવી ૬૫ હસ્તપ્રતિઓ તરફ તેઓનું ધ્યાન ગયું. તેમણે પરમપૂજ્ય આચાર્ય મહારાજ શ્રી વિજયનન્દન સૂરીશ્વરજી મહારાજ પાસે તે પ્રતિઓની માગણી કરતાં તેઓશ્રીએ પણ સૌહાર્દપૂર્વક તે પ્રતિઓ મોકલાવી આપી. તે તમામ પ્રતિઓની શ્રી આગમપ્રભાકરજી મહારાજે માઈક્રોફિલ્મ લેવરાવી. તે પ્રસંગે આ પ્રતિ તરફ તેઓનું ધ્યાન વિશેષરૂપે ખેંચાયું–તેના આરંભના ऐँ થી શરૂ થતા શ્લોકને કારણે. પછી તેમણે તે પ્રતિનું અંતિમ પૃષ્ઠ જોતાં, તેમાં ઉપાધ્યાયજી મહારાજે સ્વહસ્તે લખેલ એક પુષ્પિકા-શ્લોક, જેના ઉપર કાળી મસીનો કૂચડો ફેરવવામાં આવ્યો હોવા છતાં, બારીકીથી નિહાળતાં તેના હ્રસ્વ इ, દીર્ઘ ई તથા કાના–માત્રા વગેરેની લંબાઈ વગેરેને કારણે તે સ્વયં ઉપાધ્યાયજી મહારાજના જ હસ્તાક્ષર હોવાનું તેમની અનુભવી નજરે શોધી કાઢયું. વધુમાં તે શ્લોક પણ તેમની પાસેની ઉપાધ્યાયજી–કૃત ગ્રંથોની અન્યાન્ય પ્રતિઓમાં આ જ રીતે ઉપાધ્યાયજી મહારાજના સ્વહસ્તે લખા-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ચેલો વિદ્યમાન હતો, ને તેની સાથે મેળવતાં તેઓને આ બાબતની સો ટકા ખાતરી મળી ગઈ.

આ આખીયે વાત, આભારની તથા હર્ષની અપાર લાગણી સાથે, તેઓએ પૂજ્ય આચાર્ય શ્રી વિજયનન્દનસૂરીશ્વરજી મહારાજ ઉપરના પોતાના તત્કાલીન એક પત્રમાં લખી છે. એમાં તેઓએ એ શ્લોક પણ નોંધ્યો છે, જેનું ચોથું ચરણ તે પત્ર લખતી વેળા તેઓને યાદ ન આવતાં તે બાકી રાખેલું. એ પૂરો શ્લોક આ પ્રમાણે છે:

**स्तंभतीर्थपुर रत्नमेघजी-नंदनो जयतसीति नामभृत् ।**
**ग्रंथसंततिमिमां प्रतापसी-भ्रातृयुक् सुकृतधरली** (रो व्यली)
**लिखत्** ॥१॥

અર્થાત્ સ્તંભતીર્થ–ખંભાતના શ્રાવકરત્ન મેઘજીના સુકૃતધર પુત્ર જયતસીએ પોતાના પ્રતાપસી નામે ભાઇ સહિતે આ ગ્રંથ–સંતતિ (ઘણા ગ્રંથો) લખાવી છે.

આ જ શ્લોક ઉપાધ્યાયજી મહારાજના 'ઐન્દ્રસ્તુતિચતુર્વિંશતિકા' નામના અને "પાતંજલયોગદર્શન–વૃત્તિ" નામના ગ્રંથોની પ્રતિઓના અંત ભાગમાં પણ તેઓશ્રીના સ્વહસ્તે લખાયેલો જોવા મળે છે. (આ બે પ્રતિઓ અમદાવાદના શ્રી લા. દ. ભા. સં. વિદ્યા મન્દિરમાં છે.) તે ઉપરથી સમજાય છે કે આ શ્લોકનિર્દિષ્ટ શ્રાવક જયતસીએ ઉપાધ્યાયજી મહારાજના ઘણા ગ્રંથોની નકલો લખાવી હશે અને તે દરેક ગ્રંથના અંતે પોતાની મહોરછાપ રૂપે તથા શ્રુતભક્ત શ્રાવકરત્ન જયતસીના ગુણસ્મરણ રૂપે આ શ્લોક ઉપાધ્યાયજી મહારાજે લખ્યો હશે.

પ્રસંગોપાત્ત, અહીં જ સમજી લેવું ઘટે કે એ તમામ નવા લખાતા–લખાયેલા ગ્રંથો વાંચી જઈને શોધવાનો અવકાશ ઉપાધ્યાયજી મહારાજને નહિ રહેતો હોય એવું, પ્રસ્તુત **बन्धहेतुभङ्ग प्रकरण**ના આદર્શમાં રહી ગયેલી અઢળક અશુદ્ધિઓને જોતાં કહી શકાય.

પૂજ્ય મુનિરાજ શ્રી પુણ્યવિજયજી મહારાજે તો આ ગ્રંથની માઇક્રોફિલ્મ લેવરાવવા ઉપરાંત પ્રેસ કોપી પણ કરાવી લીધી હતી, અને તે છપાવવાનું પણ નક્કી કરેલું, એવો નિર્દેશ પણ તેમના ઉપર્યુકત પત્રમાં સ્પષ્ટ છે. પરંતુ તે પ્રેસ કોપી કે માઇક્રોફિલ્મ અત્યારે મને મળી શકી નથી.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

કમનસીબની વાત તો એ છે કે આ ગ્રંથની હસ્તપ્રતિના અંત ભાગમાં ખુદ ઉપાધ્યાયજી મહારાજના હાથે લખાયેલા શ્લોક ઉપર કોઇકે મષીનો–કાળી શાહીનો કૂચડો ફેરવી દીધો છે, અને એ રીતે ઉપાધ્યાયજી મહારાજ પ્રત્યેનો પ્રબળ દ્વેષભાવ પ્રગટ કર્યો છે. તેજસ્વી મનુષ્યોને યુગે યુગે દુર્જનો તરફથી શોષવાનું જ રહે છે, એમ આ દાખલો લઇને કહી શકાય. વસ્તુતઃ આજે પણ ઉપાધ્યાયજી મહારાજ જેવા મહાપુરુષનો અવર્ણવાદ બોલનારા તથા લખનારા પામરાત્માઓ ક્યાંક ક્યાંક જોવા મળી આવે છે, એ ઉપરના વિધાનને સબળ પુષ્ટિ આપનારી બાબત છે.

આ ગ્રંથની હસ્તપ્રતિ સ્વાધ્યાયાર્થે ધીરવા બદલ, ખંભાતની તપાગચ્છાધિપતિ આચાર્ય શ્રી વિજયનેમિસૂરીશ્વરજી–જ્ઞાનશાળાના વ્યવસ્થાપકોનો આભાર સહિત ઉલ્લેખ કરવો ઉચિત સમજું છું.

ન્યાયવિશારદ ન્યાયાચાર્ય મહોપાધ્યાય શ્રી યશોવિજયજી ગણિની ત્રિશતાબ્દીના આ વર્ષે, તેમના જ રચેલા પરંતુ અજ્ઞાત–અપ્રાપ્ય એવા આ ગ્રંથને, યથામતિ શોધીને–વ્યવસ્થિત કરીને વિદ્વજ્જનોના કરકમલમાં શ્રીગુરુકૃપાએ મૂકવાનો અવસર મળ્યો છે, તે જીવનનો ધન્ય અવસર છે.

## ઉદ્ધરણો તથા ઉદાહરણો :–

આ લઘુગ્રંથમાં સાક્ષીરૂપે લેવાયેલાં, અન્ય ગ્રંથોનાં ઉદ્ધરણો આ પ્રમાણે છે :

| પૃષ્ઠાંક | | અવતરણ | મૂળ સ્થાન |
|---|---|---|---|
| ૧૨ | (૧) | **पत्थ इत्थिवेदो ण लब्भइ । कहं ? ।** | |
| | | **इत्थिवेअगेसु ण उववज्जइत्ति कउ ॥** | સપ્તતિકાચૂર્ણિ |
| ૧૨ | (૨) | **कयाइ होज्ज इत्थिवेयगेसुत्ति ॥** | ,, ,, |
| ૧૭ | (૩) | **सव्वगुणठाणगेसु० ॥** | **पंचसंग्रहे हेतुद्वारे गा. १४** |
| ૨૨ | (૪) | **सोलस मिच्छणिमित्ता० ॥** | ,, ,, ,, १९ |
| ૨૨ | (૫) | **चतुमिच्छमिच्छअविरइ० ॥** | **षडशीतिके गाथा ५३** |

અને નોંધપાત્ર ઉદાહરણો કે ન્યાયો આ પ્રમાણે છે :

| પૃષ્ઠાંક | | અવતરણ | મૂળ સ્થાન |
|---|---|---|---|
| ૨૨ | (૧) | **तृणारणिमणिवत् ॥** | **पंक्तिः ९** |
| ૨૩ | (૨) | **पार्श्वापत्यस्थविरप्रति** વચનાનાં **विभेद इव ॥** | ,, २६ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

પ્રાંતે, પ. પૂ. ગુરુ ભગવંત આચાર્ય મહારાજ શ્રી વિજય સૂર્યોદયસૂરીશ્વરજી મહારાજની કૃપાથી આ પ્રકરણ ગ્રંથનું યથામતિ સંપાદન કરીને વિદ્વાનો સમક્ષ રજૂ કરી રહ્યો છું. આમાં ક્યાંય કાંઈ પણ ક્ષતિ રહી હોય તો તે પ્રત્યે સુજ્ઞજનો ધ્યાન દોરે એવી વિજ્ઞપ્તિ સાથે વિરમું છું.

વિ. સં. ૨૦૪૩ માગશર શુદિ ૩ **–શીલચન્દ્રવિજય**

તા. ૪–૧૨–૧૯૮૬

ભાવનગર.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीशङ्खेश्वरपार्श्वनाथाय नमो नमः ॥
नमो नमः श्रीगुरुनेमिसूरये ॥
न्यायविशारद – न्यायाचार्य – महोपाध्याय
श्रीयशोविजयजीगणिभिः प्रणीतं

# बन्धहेतुभङ्गप्रकरणम्

ऐँ नमः ॥ ऐन्द्रवृन्दनतं नत्वा
वीरं तत्त्वार्थदेशिनम् ।
स्वान्योपकृतये बन्ध-
हेतुभङ्गान् प्रचक्ष्महे ॥१॥

तत्र मिथ्यात्वाऽविरतिकषाययोगा बन्धहेतवः । तत्त्वार्थाऽश्रद्धानं मिथ्यात्वम् । तत् पञ्चधा, आभिग्रहिकमनाभिग्रहिकमाभिनिवेशिकं सांशयिकमनाभोगं चेति । तत्रेदमेव दर्शनं शोभनं नान्यदित्येवंरूपेण कुदर्शनाभिग्रहेण निर्वृत्तमाभिग्रहिकम्, यथा बोटिकादिकुदर्शनग्रहः । तद्विपरीतमनाभिग्रहिकं, यथा सर्वाणि दर्शनानि शोभनानीत्यभ्युपगमः । न चेदमंशे विपर्ययाविपर्ययरूपत्वात् सम्यग्मिथ्यात्वं स्यात्; सर्वांशविपर्ययाविपर्ययरूपत्वाभावाद् भेदान्तरं वा स्यादिति शङ्कनीयम् । विपर्ययमात्रस्यैव मिथ्यात्वलक्षणत्वात्, सर्वांशतत्त्वरुचिरूपस्यैव च सम्यक्त्वलक्षणत्वात् ।

अभिनिवेशो जानतोऽतिस्वमतिकल्पनया तत्त्वविप्लवस्तेन निर्वृत्तमाभिनिवेशिकं यथा गोष्ठामाहिलादीनाम् । भगवदुक्तं धर्मास्तिकायादि सत्यं नवेत्यादिसंशयेन निर्वृत्तं सांशयिकम् । आभोगेन सदसत्परिभावनलक्षणेन रहितमनाभोगं, तच्चैकेन्द्रियादीनाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अविरतिः षट्कायवधान्तःकरणेन्द्रियानियमभेदाद् द्वादशधा । तत्र कायवधः पृथिव्यादिविषययतनाऽभावः । अन्तःकरणाद्यनियमश्चानिवारिता स्वस्वविषयप्रवृत्तिः ।

कषायाः षोडशकषाय–नवनोकषायभेदैः पञ्चविंशतिधा । तत्र क्रोधमानमायालोभाश्चत्वार एव कषाया अनन्तानुबन्ध्य–[प्रत्याख्यान-] प्रत्याख्यानावरण–संज्वलनभेदैः षोडश भवन्ति । तत्राऽनन्तं संसारमनुबध्नन्तीत्यनन्तानुबन्धिनः । एषां च संयोजना इति द्वितीयमप्यस्ति नाम, संयोज्यन्तेऽनन्तैर्भवैर्जन्तवो यैस्ते संयोजना इति व्युत्पत्तेः । न विद्यते स्वल्पमपि प्रत्याख्यानं येषामुदयात्तेऽप्रत्याख्यानः (नाः) । प्रत्याख्यानं सर्वविरतिरूपमाव्रियते यैस्ते प्रत्याख्यानावरणाः । परीषहोपसर्गनिपाते सति चारित्रिणमपि सं–ईषज्ज्वलयन्तीति संज्वलनाः ।

कषायैः सहचारिणो नोकषायाः । नोशब्दस्य साहचर्यवाचित्वात् । कैः कषायैः साहचर्यमिति चेदाद्यैर्द्वादशभिः, तत्क्षयानन्तरमेव ता(नो)कषायक्षपणाय क्षपकस्य प्रवृत्तेः । ते च वेदत्रिक–हास्यादिषट्कभेदान्नवधा । पुंवेदः स्त्रीवेदो नपुंसकवेदश्चेति वेदत्रिकम् । हास्यरत्यरतिभयशोकजुगुप्सा हास्यादिषट्कम् ।

योगः(गाः)पञ्चदश । चतुर्द्धा मनोवचसी सप्तधा च काययोग इति । तत्र मनः सत्यमसत्यं सत्यासत्यमसत्यामृषा चेति चतुर्द्धा । तत्र वस्तुप्रतिष्ठासया जिनमतानुसारेण यद्विकल्पतेऽस्ति जीवः सदसद्रूप इत्यादि, तदाराधकत्वात् सत्यं परिभाषितम् । यत्र जिनमतोत्तीर्णं विकल्प्यते ' नास्ति जीव ' इत्यादि, तदसत्यम्, विराधकत्वात् । धवखदिरपलाशादिमिश्रेषु बहुष्वशोकवृक्षेष्वशोकवनमेवेदमितिविकल्पनपरं सत्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्यम् । अत्र हि कतिपयाशोकवृक्षाणां सद्भावात् सत्यताऽन्येषामपि धवादीनां सद्भावादसत्यता । व्यवहारनयमतापेक्षया चैवमुच्यते, परमार्थतस्त्वभिप्रेतान्यनिषेधादसत्यमेवेदम् । अशोकप्राधान्यविवक्षया भावसत्यमेव वा । उत्पन्नमिश्रादिवचनं तु सङ्ख्याशब्दानां पर्याप्त्याऽन्वयबोध एव साकाङ्क्षत्वादसत्यमेव । वस्तुप्रतिष्ठासामन्तरेण स्वरूपमात्रपर्यालोचनपरं 'हे देवदत्त ! घटमानये' त्यादिविकल्पकं मनोऽसत्यामृषम् । इदं हि न यथोक्तलक्षणं सत्यं नापि मृषेति । इदमपि व्यवहारनयमतापेक्षया द्रष्टव्यं, तत्त्वतस्तु विप्रलिप्सादिपूर्वकं असत्येऽन्तर्भवति, अन्यत्तु सत्ये ।

इत्थमेव वचोऽपि चतुर्द्धाऽवसेयम् ।

काययोग औदारिकवैक्रियाहारक–तत(तत्त)न्मिश्र ३ कार्मणयोगभेदात् सप्तविधः । तत्रोदारं तीर्थकरादिशरीरापेक्षया प्रकृत्या बृहत्प्रमाणं वा । उदारमेवौदारिकम् । औदारिकमिश्रं नरतिरश्चामपर्याप्तावस्थायां केवलिनः केवलिसमुद्घातावस्थायां वा । विविधा विशिष्टा वा क्रिया विक्रिया तस्यां भवं वैक्रियम् । तच्च द्विधा – औपपातिकं लब्धिप्रत्ययं वा (?च) । आद्यं देवनारकाणां द्वितीयं नरतिरश्चाम् । वैक्रियमिश्रं देवनारकाणामपर्याप्तावस्थायाम् । नरतिरश्चां च वैक्रियप्रारम्भकाले । तत्परित्यागकालेऽपीति केचित् । जिनर्द्धिदर्शनादिहेतोर्लब्धिविशेषवशादाह्रियत इत्याहारकम् । तच्च वैक्रियादत्यन्तशुभं स्वच्छस्फटिकशिलाभम् । आहारकमिश्रमाहारकस्य प्रारम्भकाले । तत्परित्यागकालेऽपीति केचित् । कर्मैव कार्मणम् । तच्च जन्तोर्गत्यन्तरसंक्रान्तौ साधकतमम् । अस्ति चाऽन्यत्तैजसमपि शरीरं यद्भुक्ताहारपरिणमनहेतुर्विशिष्टतपोलब्धिकस्य तेजोलेश्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विनिर्गमहेतुश्च, परं तत् कार्मणेन सहाऽव्यभिचारीति तद्योगः पृथग् न गृहीतः ।

तदेवमुक्ता मिथ्यात्वाद्यवान्तरभेदाः । अथ मिथ्यात्वादयो मूलभेदा गुणस्थानेष्वभिधीयन्ते ।—

तत्र मिथ्यादृष्टिगुणस्थाने चतुःप्रत्ययो बन्धस्तत्र मिथ्यात्वाविरतिकषाय[योग]लक्षणानां चतुर्णामपि हेतूनां सत्त्वात् । मिश्रे सासादनेऽविरतसम्यगृदृष्टौ च मिथ्यात्वाभावात् त्रिप्रत्ययकः । देशविरते किञ्चिन्न्यूनत्रिप्रत्ययकः, तस्य त्रसासंयमाभावात् । प्रमत्तादारभ्य सूक्ष्मसम्परायं यावद् द्विप्रत्ययकः, प्रमत्तादीनां मिथ्यात्वाऽविरत्यभावात् । उपशान्तमोहादित्रये केवलयोगप्रत्ययः, अयोगी तु अबन्धक इत्युक्ता गुणस्थानेषु बन्धहेतुमूलभेदाः । अथ तेष्वेव यथासम्भवं तदवान्तरभेदा उच्यन्ते । —

तत्र मिथ्यादृष्टिगुणस्थाने आहारकद्विकरहिताः पञ्चपञ्चाशद्बन्धहेतवः । आहारकद्विकं तु संयमवतामेव भवतीति न तत्र तत्सम्भवः । सासादने मिथ्यात्वापगमात् पञ्चाशत् । सम्यग्मिथ्यादृष्टौ त्रिचत्वारिंशत्, यतोऽत्रानन्तानुबन्ध्युदयाभावः, न चात्र परलोकगमनसम्भवि कार्मणौदारिकमिश्रवैक्रियमिश्रसम्भवः, "न सम्ममिच्छो कुणइ कालं" मिति वचनेनास्य परलोकगमननिषेधात् । ततः पञ्चाशतः सप्तकापनयने त्रिचत्वारिंशदेव भवन्तीति । अविरतसम्यगृदृष्टौ षट्चत्वारिंशत् । यतोऽस्य परलोकगमनसम्भवेन प्रागपनीतं योगत्रयं लभ्यते । देशविरतावेकोनचत्वारिंशत् । येनात्र प्रत्याख्यानकषायोदयो न च त्रसासंयमः, सङ्कल्पजात्तस्मान्निवृत्तेरारम्भेऽपि यतनया प्रवर्त्तमानत्वेन तन्निमित्तस्य त्रसासंयमस्य सतोऽप्यविवक्षणात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृथिव्यादावीदृशारम्भरक्षाविषयविवेकेन यतनाया अभावान्न तदसंयमनिवृत्तिः । नापीह कार्मणौदारिकमिश्रसम्भवः । ते हि यथाक्रमं भवापान्तरालगतौ परभवोत्पदे(त्पाद)काले च लभ्येते, न च तदानीं देशविरतिसम्भव इति षट्चत्वारिंशतः सप्तापनयनादिहैकोनचत्वारिंशद्बन्धहेतव उपपद्यन्त इति । अविरत्यैकादशक-प्रत्याख्यानावरणचतुष्टयापनयनादाहारकद्विकोदयाच्च प्रमत्ते षड्विंशतिः । अप्रमत्तस्य लब्ध्यनुपजीवनादाहारकवैक्रियारम्भाऽसम्भवादाहारकमिश्र–वैक्रियमिश्रे न सम्भवत इति षड्विंशतेर्द्वयापनयनाच्चतुर्विंशतिः । अपूर्वकरणे वैक्रियाहारके अपि न भवत इति द्वाविंशतिः । हास्यादिषट्कस्याऽपूर्वकरणे व्यवच्छेदादनिवृत्तिबादरे षोडश । वेदत्रयस्य क्रोधादित्रयस्य चाऽनिवृत्तिबादरे व्यवच्छेदात् सूक्ष्मसम्पराये दश । लोभस्य सूक्ष्मसम्पराय एव व्यवच्छेदादुपशान्तमोहे नव । क्षीणमोहेऽप्येत एव नव । सयोगिजिने सप्त, आद्यान्तौ वाग्–मनोयोगौ कार्मणमौदारिकमिश्रं च । तत्र कार्मणौदारिकमिश्रे समुद्घातावस्थायाम् । अयोगिनि नैकोऽपि बन्धहेतुः । तदेवमुक्ताः सम्भवमात्रेण मिथ्यात्वाद्यवान्तरभेदा गुणस्थानेषु । अथैत एव यावन्तो यस्मिन् गुणस्थानके जघन्य [मध्य] मोत्कृष्टपदेष्वेकदा प्राप्यन्ते तस्मिंस्तावन्त उच्यन्ते ।—

तत्र मिथ्यादृष्टौ जघन्यपदे युगपद्भाविनो बन्धहेतवो दश, उत्कृष्टपदेऽष्टादश, मध्यमास्त्वेतदन्तर्गताः । एवमुत्तरत्रापि मध्यमभावना कार्या । सासादने जघन्यपदे दश, उत्कृष्टपदे सप्तदश । मिश्राऽविरतयोर्जघन्यतो नव, उत्कर्षतः षोडश । देशविरते जघन्यपदेऽष्टौ, उत्कृष्टपदे चतुर्दश । यतित्रिके जघन्यतः पञ्च उत्कृष्टतः सप्त । अनिवृत्तिबादरे जघन्यतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वावुत्कर्षतस्त्रयः । सूक्ष्मसम्पराये ऽजघन्योत्कृष्टौ द्वौ । शेषाणामेकैकः ।

तत्र मिथ्यादृष्टौ दश तावदिमे—पञ्चानां मध्ये एकतमं मिथ्यात्वं, यदैककायं हन्ति तदैककायघातः, यदा तु द्वावन्यतमौ हन्ति तदा द्विकघातः, एवं त्रिकादिघाता अप्यूह्याः । एतेषां षण्णां घातभेदानां मध्ये एकोऽन्यतमो घातभेदः पञ्चानामक्ष(क्षा)णामन्यतमस्याक्षस्याऽसंयमः । हास्यरत्योररतिशोकयोश्चान्यतरस्य युगलस्योदयः । त्रयाणां वेदानामन्यतमस्यैकस्य वेदस्योदयः । अनन्तानुबन्धिवर्जानां कषायाणामन्यतमस्य च क्रोधादित्रिकस्य । क्रोधमानमायालोभा हि युगपन्नोदयमायान्ति, किन्तु क्रमेणैव । केवलमेकस्मिन्नप्रत्याख्यानादिके क्रोधादित्रिके उदीयमाने शेषा अपि क्रोधादय उदयमायान्तीत्यन्यतमक्रोधादित्रिकग्रहणम् । तथा दशानां योगानामन्यतमो योगः । आहारकद्विकं ह्यत्र न भवत्येव । अनन्तानुबन्धिनामनुदय एव च दश बन्धहेतुभेदाः संभवन्ति । तदनुदयश्च यः सम्यग्दृष्टिः प्रथमतोऽनन्तानुबन्ध्युद्वलनं कृत्वैव विश्रान्तो, न मिथ्यात्वादिक्षयाय तथाविधसामग्र्यभावादुद्युक्तवान् ; ततः—कालान्तरे मिथ्यात्वं गतस्तत्प्रत्ययतो भूयोऽप्यनन्तानुबन्धिन उपचिनोति । तेषु चोपचीयमानेषु प्रतिसमयं शेषचारित्रमोहप्रकृतिदलिकं संक्रमयति । संक्रमय्य चाऽनन्तानुबन्धितया परिणमयति । ततो यावन्न संक्रमावलिका [न] तिक्रामति तावत्तस्य मिथ्यादृष्टेरपि सतो [ऽनन्तानुबन्ध्यनुदयो ?] भवति । अनन्तानुबन्ध्युदयाभावे च मिथ्यादृष्टेर्मरणं सत्कर्मादिग्रन्थेषु प्रतिषिद्धं ततो भवान्तरगमनसम्भविनो वैक्रियमिश्रौदारिकमिश्रकार्मणकाययोगा न भवन्तीति दशानां योगा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नामन्यतमो योग इत्युक्तम् । अनन्तानुबन्धिभयजुगुप्साश्च विकल्पितोदया इति तदुदयाभावे जघन्यपदे दश बन्धहेतवः। अत्र मिथ्यात्वमवान्तरभेदापेक्षया पञ्चधा । ते च पञ्चापि भेदा एकैकस्मिन् कायघाते सम्भवन्तीति षट् पञ्चभिर्गुण्यन्ते जाता त्रिंशत् । ते चैकैकस्मिन् इन्द्रियाऽसंयमे प्राप्यन्ते; इन्द्रियाऽसंयमाश्च पञ्च, मनोऽसंयमस्त्वेतदन्तर्गतत्वादेव न पृथग् विवक्षितः; ततः त्रिंशता पञ्च गुण्यन्ते, जातं सार्द्धशतम् । इदं च सार्द्धं शतमेकैकस्मिन् युगले प्राप्यते इति सार्द्धशतेन द्वे गुण्यते, जातानि त्रीणि शतानि । अमूनि चैकैकस्मिन् वेदे सम्भवन्ति, वेदाश्च त्रय इत्येतैस्त्रिभिः शतैस्त्रयो गुण्यन्ते, जातानि नव शतानि । तानि चैकैकस्मिन् क्रोधादित्रिके प्राप्यन्ते, क्रोधादयश्च चत्वार इति चत्वारो नवभिः शतैर्गुण्यन्ते, जातानि षट्त्रिंशच्छतानि । तानि च प्रत्येकमेकैकस्मिन् योगे सम्भवन्ति, योगाश्च दशेति दश षट्त्रिंशच्छतैर्गुण्यन्ते, जातानि षट्त्रिंशत्सहस्राणि । एतावन्तो दशानां बन्धहेतूनां भङ्गाः ।

त एव प्रागुक्ता दश भयप्रक्षेपादेकादश । तत्र च भङ्गाः प्रागुक्तप्रमाणाः –३६००० । अथवा जुगुप्साप्रक्षेपादेकदे(काद)श । अत्रापि भङ्गास्तु (स्ता) वन्त एव ३६००० । अथवाऽनन्तानुबन्ध्यन्यतमक्रोधादिप्रक्षेपादेकादश । अनन्तानुबन्ध्युदये च योगास्त्रयोदश भवन्तीति कषायगुणनतो लब्धानि षट्त्रिंशच्छतानि त्रयोदशभिर्गुण्यन्ते, जातानि षट्चत्वारिंशत्सहस्राण्यष्टशताधिकानि । अथवा षण्णां कायघातानामन्यतमः कायघात इति यत् प्रागुक्तं तदिह न गृह्यते, किन्तु पृथिव्याद्यन्यतमकायवधद्वयं प्राणिभेदेन तद्व्यपरोपणभेदाश्रयणादित्येकादश भवन्ति । षण्णां च पदानां द्विकसंयोगे भङ्गाः पञ्चदश ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो मिथ्यात्वभेदैः पञ्चभिः पञ्चदश गुण्यन्ते, जाता पञ्च-सप्ततिस्तया पञ्चेन्द्रियाणि गुण्यन्ते, जातानि त्रीणि शतानि पञ्चसप्तत्यधिकानि । तैर्युगलद्विकं गुण्यते, जातानि सप्त शतानि पञ्चाशदधिकानि । तैस्त्रयो वेदा गुण्यन्ते, जातानि द्वाविंशति शतानि पञ्चाशदधिकानि । तैः कषायचतुष्टयं गुण्यते, लब्धानि नव सहस्राणि । तानि चैकैकस्मिन् योगे प्राप्यन्त इति तैर्दशानां या (यो) गानां गुणने जातानि नवतिसहस्राणि । सर्वसङ्ख्यया मिथ्यादृष्टावेकादशबन्धहेतुभङ्गानां द्वे लक्षे अष्टाशीतिसहस्राणि २८८००० ।

त एव पूर्वोक्ता दश बन्धहेतवो भयजुगुप्साप्रक्षेपाद् द्वादश । तत्र भङ्गाः प्राग्वत् षट्त्रिंशत्सहस्राणि । अथवाऽनन्तानुबन्धि–भयप्रक्षेपाद्द्वादश, [अ]नन्तानुबन्ध्युदये च योगास्त्रयोदशेत्यत्र भङ्गाः षट्चत्वारिंशत्सहस्राण्यष्टशताधिकानि । यद्वाऽनन्तानुबन्धि–जुगुप्साप्रक्षेपाद् द्वादश, अत्राप्येतावन्त एव भङ्गाः ४६८०० । अथवा कायत्रयवधग्रहाद् द्वादश । षण्णां च पदानां त्रिकसंयोगे विंशतिर्भङ्गास्ततः पञ्चभिर्मिथ्यात्वभेदै(:) कायवधा विंशतिर्गुण्यन्ते, जातं शतं; तेन पञ्चेन्द्रियाऽसंयमगुणने पञ्च शतानि; तैर्युगलद्विकगुणंते(णने)न सहस्रं; तेन वेदत्रयगुणने सहस्रत्रयं; तेन कषायचतुष्टयगुणने द्वादश सहस्राणि; तैर्योगदशकताडने जातं लक्षमेकं विंशतिसहस्राधिकम् । अथवा कायद्वयवध–भयप्रक्षेपाद् द्वादश । तत्र भङ्गा नवतिसहस्राणि । एवं जुगुप्सा–कायद्वयवधेऽपि प्रक्षिप्ते ज्ञेयम् । अथवाऽनन्तानुबन्धी(न्धि) – कायद्वयवधप्रक्षेपे द्वादश । तत्र च कषायताडनलब्धानां नवसहस्राणां त्रयोदशयोगैर्गुणने भङ्गसङ्ख्या लक्षमेकं सप्तदश च सहस्राणि । सर्वसङ्ख्यया द्वादशहेतुभङ्गाः पञ्च लक्षाः षट्चत्वारिंशत्सहस्राणि षट्शतानि च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वोक्तेषु दशसु बन्धु(न्ध)हेतुषु भय–जुगुप्सा–ऽनन्तानुबन्धिप्रक्षेपात् त्रयोदश भवन्ति। अनन्तानुबन्ध्युदये च योगास्त्रयोदशेति प्राग्वल्लब्धानि षट्चत्वारिंशत्सहस्राण्यष्टौ च शतानि। यदा कायचतुष्टयवधपरिग्रहा(त्) त्रयोदश। षण्णां च पदानां चतुष्कसंयोगे भङ्गाः पञ्चदशेति पञ्चदशाद्यङ्कताडने नवतिसहस्राणि भङ्गाः। अथवा भय–कायत्रयवधप्रक्षेपे त्रयोदश। त्रिकसंयोगे च भङ्गा विंशतिरिति प्राग्वल्लब्धं विंशतिसहस्राधिकं लक्षम्। एवं जुगुप्साकायत्रयवधेऽपि प्रक्षिप्ते द्रष्टव्यम्। यद्वाऽनन्तानुबन्धि–कायत्रयवधपरिग्रहे त्रयोदश। तत्र भङ्गा लक्षं षट्पञ्चाशत्सहस्राधिकम्। यद्वा जुगुप्सा–भयकायद्वयबं-(यव)धप्रक्षेपे त्रयोदश। तत्र भङ्गा नवतिसहस्राणि। त(भ)या–ऽनन्तानुबन्धि–कायद्वयवधप्रक्षेपाद्वा त्रयोदश। तत्र भङ्गानां लक्षं सप्तदशसहस्राधिकम्। एवमनन्तानुबन्धि-जुगुप्सा-कायद्वयवधपरिग्रहेऽपि। संख्या(ख्य)या त्रयोदशबन्धहेतुभङ्गा अष्टौ लक्षाः षट्पञ्चाशत्सहस्राणि चाष्टशताधिकानि।

त एव दश बन्धहेतवः कायपञ्चकवधपरिग्रहे चतुर्दश भवन्ति। षण्णां च कायानां पञ्चसंयोगे भङ्गाः षट्। ततोका(ऽङ्का)नां गुणने भङ्गाः षट्त्रिंशत्सहस्राणि। अथवा कायचतुष्टयवध–भयपरिग्रहे चतुर्दश। षण्णां च चतुष्कसंयोगे भङ्गाः पञ्चदशेति पञ्च (?) पञ्चदशाद्यङ्कमेने(ताडने)भङ्गा नवतिसहस्राणि। एवं कायचतुष्टयवध-जुगुप्सापरिग्रहेऽपि। यद्वा कायचतुष्टयवधाऽनन्तानुबन्धिपरिग्रहे चतुर्दश। अनन्तानुबन्ध्युदये च योगास्त्रयोदशेति भङ्गा लक्षमेकं सप्तदश च सहस्राणि। यद्वा कायत्रयवध–भय–जुगुप्सोपादानाच्चतुर्दश। कायत्रयसंयोगे च भङ्गा विंशतिरिति लब्धं प्राग्वद्विंशत्युत्तरं लक्षम् [विंशतिसहस्रोत्तरं लक्षम्]। यद्वा कायत्रयवध–भया-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽनन्तानुबन्धिग्रहणातुच्चतुर्दश । तत्र भङ्गानां षट्पञ्चाशत्सहस्राधिकं लक्षम् । एवं कायत्रयवध–जुगुप्साऽनन्तानुबन्धिपरिग्रहेऽपि । अथवा कायद्वयवध–भय–जुगुप्सा–ऽनन्तानुबन्धिपरिग्रहे चतुर्दश । तत्र भङ्गानां प्राग्वत् सप्तदशसहस्रोत्तरं लक्षम् । सर्वसङ्ख्यया चतुर्दशबन्धहेतुभङ्गा अष्टौ लक्षा द्व्यशीतिश्च सहस्राणि ।

त एव दश षट्कायवधोपादाने पञ्चदश भवन्ति । षण्णां च कायानां षट्कसंयोगे भङ्ग एकः । ततः पञ्चैकाद्यङ्कताडने भङ्गाः षट् सहस्राणि । यदि वा भयको(का)य पञ्चकवधपरिग्रहे पञ्चदश । तत्र प्राग्वद् भङ्गाः षट्त्रिंशत्सहस्राणि । एवं जुगुप्सा–कायपञ्चकवधपरिग्रहेऽपि । अथवा कायपञ्चकवधाऽनन्तानुबन्ध्युपादाने पञ्चदश । तत्र योगाः त्रयोदशेति भङ्गानी (?ङ्गाः) षट्चत्वारिंशत्सहस्राण्यष्टौ च शतानि । यद्वा कायचतुष्टयवध–भय--जुगुप्सापरिग्रहे पञ्चदश । तत्र भङ्गा नवतिसहस्राणि । कायचतुष्टयवध--भयाऽनन्तानुबन्धिप्रक्षेपाद्वा पञ्चदश । तत्र भङ्गानां सप्तदशसहस्रोत्तरं लक्षम् । एवं काय चतुष्टयवध-जुगुप्साऽनन्तानुबन्धिप्रक्षेपेऽपि । कायत्रयवध–भय–जुगुप्सा–ऽनन्तानुबन्धिप्रक्षेपेऽपि पञ्चदश । तत्र भङ्गानां षट्पञ्चाशत्सहस्राधिकं लक्षम् । सर्वसङ्ख्यया पञ्चदशबन्धहेतुभङ्गानां लक्षषट्कमष्टचत्वारिंशच्छताधिकम् ।

त एव दश कायषट्कवध–भयप्रक्षेपात् षोडश । तत्र भङ्गाः षट्सहस्राणि । एवं कायषट्(क)वध–जुगुप्साप्रक्षेपेऽपि । षट्कायवधाऽनन्तानुबन्धिप्रक्षेपेऽपि षोडश । तत्र भङ्गा अष्टसप्ततिशतानि । कायपञ्चकवध–भय–जुगुप्साप्रक्षेपे वा षोडश । तत्र भङ्गाः षट्त्रिंशत्सहस्राणि । यद्वा कायपञ्चकवध–भया–ऽनन्तानुबन्धिप्रक्षेपे षोडश । तत्र भङ्गाः षट्चत्वारिंशत्सहस्राण्यष्टौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च शतानि। एवं कायपञ्चकवध-जुगुप्साऽनन्तानुबन्धिप्रक्षेपेऽपि। यद्वा कायचतुष्टयवध–भय-जुगुप्साऽनन्तानुबन्ध्युपादाने षोडश। तत्र भङ्गानां सप्तदशसहस्राधिकं लक्षम्। सर्वसङ्ख्यया षोडश-बन्धहेतुभङ्गा द्वे लक्षे षट्षष्टिसहस्राणि चत्वारि शतानि।

त एव दश कायषट्कवध–भय–जुगुप्साग्रहणे सप्तदश स्युः। तत्र भङ्गाः षट् सहस्राणि। यद्वा षट्कायवध-[भया] नन्तानुबन्धिग्रहणे सप्तदश। तत्र भङ्गाः प्राग्वदष्टसप्तति-शतानि। एवं षट्कायवध–जुगुप्सा–ऽनन्तानुबन्धिप्रक्षेपेऽपि। अथवा कायपञ्चकवध–भय–जुगुप्सा–ऽनन्तानुबन्धिप्रक्षेपे सप्त-दश। तत्र भङ्गानां षट्चत्वारिंशत्सहस्राण्यष्टौ च शतानि। सर्वसङ्ख्यया सप्तदशबन्धहेतुभङ्गानामष्टषष्टिसहस्राणि चतुःशता-धिकानि।

त एव दश षट्कायवध–भय–जुगुप्सा–ऽनन्तानुबन्धि-प्रक्षे[पे]ऽष्टादश। तत्र भङ्गानामष्टसप्ततिशतानि। सर्वसङ्ख्यया मिथ्यादृष्टौ बन्धहेतुभङ्गाश्चतुस्त्रिंशल्लक्षाः सप्तसप्ततिसहस्राणि षट्-शतानि च। भाविता मिथ्यादृष्टौ बन्धहेतुभङ्गाः॥ अथ सासादने भाव्यन्ते।—

तत्र च त्रिभिर्वेदैस्त्रयोदश योगा गुण्यन्ते, जाता एकोन-चत्वारिंशत्। तत एकरूपमपसार्यते; यतः सासादनभावं प्राप्तस्य नपुंसकवेदोदये वैक्रियमिश्रः काययोगो न सम्भवति; वैक्रियमिश्रो हि काययोगः कार्मणेन सह विवक्षितः, स च नपुंसकवेदोदये नरकभवोत्पत्तौ प्राप्यते, नान्यत्र; सासादन-भावं प्राप्तश्च नरकं[न] यातीति स्थिता अष्टत्रिंशत्। ते षड्भिः कायवधैर्गुण्यन्ते, जातमष्टाविंशं शतद्वयम्। तत् पञ्चभिरिन्द्रि-याऽसंयमैर्गुण्यते, जातान्येकादशशतानि चत्वारिंशदधिकानि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तानि युगलद्विकेन गुण्यन्ते, जातानि द्वाविंशतिशतान्यशीत्यधिकानि । तानि कषायचतुष्टयेन गुण्यन्ते, जातानि विंशत्यधिकान्येकविंशति( ?न्येकनवति )शतानि । एतावन्तो दशबन्धहेतूनां सासादने भङ्गाः ।

त एव दश बन्धहेतवः कायद्वयवधपरिग्रहादेकादश । तत्र षण्णां कायानां द्विकसंयोगे भङ्गाः पञ्चदश, तान् कायवधस्थाने स्थापयित्वोक्तक्रमेणाङ्कताडने द्वाविंशतिसहस्राण्यष्टशताधिकानि लभ्यन्ते । अथवा त एव दश भयप्रक्षेपादेकादश, तत्र भङ्गाः प्राग्वदेकनवतिशतानि विंशत्यधिकानि । एवं जुगुप्साप्रक्षेपेऽपि । सर्वसङ्ख्ययैकादशबन्धहेतूनां भङ्गा एकचत्वारिंशत्सहस्राणि चत्वारिंशदधिकानि ।

त एव दश कायत्रयवधपरिग्रहे द्वादश । त्रिकसंयोगे च भङ्गा विंशतिरिति तदन्वितोक्ताङ्कताडने लब्धानि त्रिंशत्सहस्राणि चतुःशताधिकानि । अथवा भयकायद्वयवधोपादाने द्वादश, तत्र भङ्गा अष्टशताधिकानि द्वाविंशतिसहस्राणि । एवं कायद्वयवध–जुगुप्साप्रक्षेपेऽपि । यद्वा भय–जुगुप्साप्रक्षेपाद् द्वादश, तत्रैकविंशति (नवति) शतानि विंशत्यधिकानि । भङ्गानां च सर्वसङ्ख्यया द्वादशबन्धहेतुभङ्गाः पञ्चाशीतिसहस्राणि विंशं च शतम् ।

त एव दश कायचतुष्टयवधपरिग्रहे त्रयोदश । चतुष्कसंयोगे च भङ्गाः पञ्चदशेति प्राग्वद् गुणने भङ्गा द्वाविंशतिसहस्राण्यष्टौ च शतानि । अथवा भयकायत्रयवधप्रक्षेपात् त्रयोदश । तत्र भङ्गानां त्रिंशत्सहस्राणि चतुःशताधिकानि । एवं कायत्रयवध–जुगुप्साप्रक्षेपेऽपि । यद्वा कायद्वयवध--भय--जुगुप्साप्रक्षेपे त्रयोदश । तत्र भङ्गा द्वाविंशतिसहस्राण्यष्टौ च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शतानि । सर्वसङ्ख्यया त्रयोदशबन्धहेतुभङ्गाः चतुःषष्टिशताधिकं लक्षम् ।

ते चैव दश कायपञ्चकवधग्रहणे चतुर्दश । पञ्चकसंयोगे च भङ्गाः षड्, इति तद्युक्तप्रागुक्ताङ्काभ्यासे भङ्गानामेकनवतिशतानि विंशत्यधिकानि । अथवा कायचतुष्टयवध--भयप्रक्षेपे चतुर्दश । तत्र भङ्गानां द्वाविंशतिसहस्राणि शताष्टकं च । एवं कायचतुष्टयवध–जुगुप्साप्रक्षेपेऽपि । कायत्रयवध–भय–जुगुप्सा-प्रक्षेपे वा चतुर्दश । तत्र भङ्गास्त्रिंशत्सहस्राणि चत्वारि च शतानि । सर्वसङ्ख्यया चतुर्दशबन्धहेतुभङ्गाः पञ्चाशीतिसहस्राणि विंशं च शतम् ।

त एव दश कायषट्कवधप्रक्षेपे पञ्चदश । षट्संयोगे चैक एव भङ्गः, ततः प्रागुक्तविधिना भङ्गाः पञ्चदशशतानि विंशत्यधिकानि । अथवा कायपञ्चकवध–भयप्रक्षेपे पञ्चदश । तत्र भङ्गा एकनवतिशतानि विंशत्यधिकानि । एवं कायपञ्च-कवध–जुगुप्साप्रक्षेपेऽपि । यद्वा कायचतुष्टयवध–भय–जुगुप्सा प्रक्षेपात् पञ्चदश । षण्णां चतुष्कसंयोगे च भङ्गाः पञ्चदशेति तद्युक्तप्रागुक्ताङ्कताडने भङ्गा द्वाविंशतिसहस्राण्यष्टौ च शतानि । सर्वसङ्ख्यया पञ्चदशबन्धहेतुभङ्गा द्विचत्वारिंशत्सहस्राणि षष्ट्य-धिकानि च पञ्च शतानि ।

त एव दश कायषट्कवध–भयप्रक्षेपे षोडश । तत्र पञ्चदशशतानि विंशानि ( ?विंशत्याधिकानि ) भङ्गानाम् । एवं कायकषट्कवध–जुगुप्साप्रक्षेपेऽपि । अथवा कायपञ्चकवध भय–जुगुप्साप्रक्षेपे षोडश । षण्णां च पञ्चकसंयोगे भङ्गा एकनवतिशतानि विंशत्युत्तराणि । सर्वे षोडशबन्धहेतुभङ्गा द्वादशसहस्राणि षष्ट्यधिकशताधिकानि (शतानि) ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त एव दश कायषट्कवध–भय–जुगुप्साप्रक्षेपात् सप्तदश। तत्र भङ्गाः पञ्चदशशतानि विंशत्युत्तराणि। सर्वसङ्ख्यया सासादने बन्धहेतुभङ्गा लक्षत्रयं त्र्यशीतिसहस्राणि चत्वारिंशच्च। भाविताः सासादने बन्धहेतुभङ्गाः।

अथ मिश्रे ते भाव्यन्ते। तत्र सासादनो [दिता] दशाऽनन्तानुबन्ध्युदयरहिता जघन्यतो नव पर्यवस्यन्ति। योगाश्चात्र दश; मिश्रे मरणाभावेन वैक्रियमिश्रौदारिकमिश्रकार्मणकाययोगाऽसम्भवात्। तत इयमङ्कस्थापना १०, ४, ३, २, ५, ६। अमीषामङ्कानामभ्यासे जातानि द्विसप्ततिशतानि। एतावन्तः सम्यग्मिथ्यादृष्टेर्नवबन्धहेतु भङ्गाः॥ त एव नव कायद्वयवधप्रक्षेपे दश। द्विकसंयोगश्च पञ्चदशभेद इति तद्युक्तोक्ताङ्कगुणने जातान्यष्टादशसहस्राणि। अथवा भयप्रक्षेपाद् दश। तत्र भङ्गाः प्राग्वद् द्विसप्ततिशतानि। एवं जुगुप्साप्रक्षेपेऽपि। सर्वसङ्ख्यया दशबन्धहेतुभङ्गा द्वात्रिंशत्सहस्राणि चत्वारि च शतानि॥ त एव नव कायत्रयवधप्रक्षेपादेकादश। त्रिकसंयोगे षण्णां विंशतिर्भङ्गा इति तद्युक्तोक्ताङ्कताडने भङ्गाश्चतुर्विंशतिसहस्राणि। यद्वा कायद्वय वध–भयप्रक्षेपादेकादश। तत्र षण्णां द्विकसंयोगे पञ्चदशभेदनिष्पत्तेरष्टादशसहस्राणि भङ्गानाम्। एवं कायद्वयवध–जुगुप्साप्रक्षेपेऽपि। अथवा भय–जुगुप्साप्रक्षेपादेकादश। तत्र भङ्गा द्विसप्ततिशतानि। सर्वसङ्ख्ययैकादशबन्धहेतुभङ्गाः सप्तषष्टिसहस्राणि शतद्वयाधिकानि।

त एव नव कायचतुष्टयवधप्रक्षेपे द्वादश। त्रिकसंयोगे च विंशतिर्भङ्गा इत्यत्र भङ्गानां चतुर्विंशतिसहस्राणि।

[अत्रैवं पाठः सम्भाव्यतेः– त एव नव कायचतुष्टय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वधप्रक्षेपे द्वादश। [१]षण्णां च चतुःसंयोगे भङ्गाः पञ्चदशेति तद्युक्तोक्ताङ्कताडने जातान्यष्टादशसहस्राणि भङ्गानाम्। यद्वा कायत्रयवध-भयप्रक्षेपे द्वादश। त्रिकसंयोगे च विंशतिर्भङ्गा इत्यत्र भङ्गानां चतुर्विंशतिसहस्राणि।] एवं कायत्रयवध--जुगुप्साप्रक्षेपेऽपि। यदि वा कायद्वयवध-भय-जुगुप्सा-प्रक्षेपाद् द्वादश। तत्र भङ्गानामष्टादश सहस्राणि। सर्वसङ्ख्यया द्वादशबन्धहेतुभङ्गाश्चतुरशीतिसहस्राणि।

त एव नव कायपञ्चकवधप्रक्षेपे त्रयोदश। पञ्चभिः षण्णां योगे भङ्गाश्च षडिति भङ्गानामिह द्विसप्ततिशतानि। यद्वा कायचतुष्टयवध-भयप्रक्षेपात् त्रयोदश। तत्र चतुष्कसंयोगीयपञ्चदशभङ्गैर्भङ्गानामष्टादशसहस्राणि। एवं कायचतुष्टयवध जुगुप्साप्रक्षेपेऽपि। अथवा कायत्रयवध-भय-जुगुप्साप्रक्षेपे त्रयोदश। षण्णां त्रिकसंयोगे च विंशतिर्भङ्गा इतीह भङ्गानां चतुर्विंशतिसहस्राणि। सर्वे त्रयोदश[बन्ध]हेतुभङ्गाः सप्तषष्टि-सहस्राणि द्वे च शते।

त एव नव कायषड्वधप्रक्षेपे चतुर्दश। षट्कसंयोगे चैक एव भङ्ग इत्युक्ताङ्काभ्यासजभङ्गानां द्वादशशतानि। यद्वा कायपञ्चकवध-भयप्रक्षेपे चतुर्दश। तत्र पञ्चकसंयोगे षड्भङ्गला-भाद् भङ्गा द्विसप्ततिशतानि। एवं कायपञ्चकवध-जुगुप्सा-प्रक्षेपेऽपि। यद्वा कायचतुष्टयवध-भय-जुगुप्साप्रक्षेपाच्चतुर्दश। षण्णां चतुष्कसंयोगे च भङ्गाः पञ्चदशेत्यष्टादशसहस्राणीह भङ्गाः। सर्वे चतुर्दशबन्धहेतुभङ्गास्त्रयस्त्रिंशत्सहस्राणि षट् च शतानि।

त एव नव कायषड्वध-भयप्रक्षेपे पञ्चदश। षट्कसं-योगे भङ्गैक्याद् भङ्गानामत्र द्वादश शतानि। एवं कायषट्-कवध-जुगुप्साप्रक्षेपेऽपि। अथवा कायपञ्चकवध-भय-जुगु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्साप्रक्षेपे पञ्चदश। तत्र षण्णां पञ्चकसंयोगे भङ्गषट्कमिति भङ्गानां द्विसप्ततिशतानि। सर्वसङ्ख्यया पञ्चदशहेतुभङ्गाः षण्णवतिशतानि।

त एव नव कायषट्कवधभय–जुगुप्साप्रक्षेपे षोडश। भङ्गाश्चात्र द्वादश शतानि। सर्वसङ्कलनया मिश्रे बन्धहेतुभङ्गा लक्षत्रयं चतुर्विंशतिशतानि च। भाविताः सम्यग्मिथ्यादृष्टौ बन्धहेतुभङ्गाः॥

अथाऽविरतसम्यग्दृष्टौ नवाद्याः षोडशान्तास्ते भाव्यन्ते। –अत्र नव प्राग्वदेव, परं योगास्त्रयोदश भवन्ति। परलोकगमनस्याप्यत्र सम्भवात्। ते त्रिभिर्वेदैस्ताड्यन्ते, जाता एकोनचत्वारिंशत्। ततो रूपचतुष्टयमपसार्यते; यतोऽविरतसम्यग्दृष्टेः स्त्रीवेदोदये वैक्रियमिश्र–कार्मणकाययोगौ न भवतः; वैक्रियमिश्रकाययोगिषु स्त्रीवेदिषु मध्येऽविरतसम्यग्दृष्टेरुत्पादाभावात्। उक्तं च सप्ततिकाचूर्णौ वैक्रियमिश्रयोगे कार्मणयोगे चैतस्य वेदद्वारे भङ्गचिन्तायाम् :–

"एत्थ इत्थिवेदो ण लब्भइ। कहं?। इत्थिवेअगेसु ण उववज्जइत्ति कउ।"

प्रायोवृत्त्या चैतदुक्तं, स्त्रीवेदिष्वपि कदाचित्तदुत्पादाद्; उक्तं च सप्ततिकाचूर्णावेव– "कयाइ होज्ज इत्थिवेअगेसुत्ति।"

तथा स्त्रीवेदोदये नपुंसकवेदोदये चौदारिकमिश्रो न भवति; तिर्यग्मनुष्येषु स्त्रीवेद–नपुंसकवेदिषु मध्येऽविरतसम्यग्दृष्टेरुत्पादा[भावात्]। तदपि प्रायोवृत्त्योक्तं, तेन न मल्लिस्वाम्यादिभिर्व्यभिचारः। तत एकोनचत्वारिंशतश्चतुष्टयापनयने पञ्चत्रिंशदवशिष्यते (न्ते)। तैः कायवधषट्कगुणने दशोत्तरं शतद्वयम्। तेनेन्द्रियाऽसंयमपञ्चकगुणने पञ्चाशदधिका

दशशती । तया युगलद्विकगुणने जातान्येकविंशतिशतानि । तैः कषायचतुष्टयगुणने चतुरशीतिशतानि । एतावन्तो नवबन्धहेतवः ( हेतुभङ्गाः ? )।

त एव नव कायद्वयवधप्रक्षेपे दश । षण्णां द्विकसंयोगे भङ्गाः पञ्चदशेति तान् कायस्थानेऽवस्थाप्योक्ताङ्कताडने एकविंशतिसहस्रास्तत्र भङ्गाः । अथवा भयप्रक्षेपे दश । तत्र भङ्गाः प्राग्वच्चतुरशीतिशतानि । एवं जुगुप्साप्रक्षेपेऽपि । सर्वसङ्कलने दशबन्धहेतुभङ्गाः सप्तत्रिंशत्सहस्राण्यष्टौ च शतानि ।

त एव नव कायत्रयवधप्रक्षेपादेकादश । षण्णां त्रिकसंयोगे च विंशतिर्भङ्गा इत्यत्र भङ्गानामष्टाविंशतिसहस्राणि । अथवा कायद्वयवध–भयप्रक्षेपे एकादश । तत्र भङ्गा एकविंशतिसहस्राणि । एवं कायद्वयवध–जुगुप्साप्रक्षेपेऽपि । यद्वा भय–जुगुप्साप्रक्षेपादेकादश । तत्र कायस्थाने षडेवेति भङ्गाश्चतुरशीतिशतानि । सर्वसङ्ख्ययैकादशबन्धहेतुभङ्गा अष्टसप्ततिसहस्राणि चत्वारि शतानि च ।

त एव नव कायचतुष्टयवधप्रक्षेपे द्वादश । तत्र चतुष्कसंयोगे भङ्गाः पञ्चदशेति तद्युक्तप्रागुक्ताङ्कगुणने भङ्गानामेकविंशतिसहस्राणि । अथवा कायत्रयवध–भयप्रक्षेपे द्वादश । तत्र कायस्थाने विंशतिरिति प्राग्वद् भङ्गा अष्टाविंशतिसहस्राणि । एवं कायत्रयवध–जुगुप्साप्रक्षेपेऽपि । यद्वा कायद्वयवध–भय–जुगुप्सा प्रक्षेपाद् द्वादश । तत्र कायस्थाने पञ्चदशेति प्राग्वद् भङ्गानामेकविंशतिसहस्राणि । सर्वसङ्ख्यया द्वादशबन्धहेतुभङ्गा अष्टनवतिसहस्राणि ।

त एव नव कायपञ्चकवधप्रक्षेपात् त्रयोदश । षण्णां पञ्चकसंयोगे च षडिति भङ्गा इह चतुरशीतिशतानि । यद्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कायचतुष्टयवध—भयप्रक्षेपात् त्रयोदश। तत्र कायस्थाने पञ्चदशेति भङ्गानामेकविंशतिसहस्राणि। एवं कायचतुष्टयवध—जुगुप्साप्रक्षेपेऽपि। अथवा कायत्रयवध—[भय] जुगुप्साप्रक्षेपे त्र[योदश।] तत्र कायस्थापने (स्थाने) विंशतिरिति प्राग्वद् भङ्गा अष्टाविंशतिसहस्राणि। सर्वे त्रयोदशबन्धहेतुभङ्गा अष्टसप्ततिसहस्राणि चतुःशताधिकानि।

त एव नव कायषट्कवधप्रक्षेपाच्चतुर्दश। तत्र कायस्थाने षट्कसंयोगीयो भङ्ग एक इति प्राग्वदङ्कगुणने भङ्गाश्चतुर्दशशतानि। अथवा कायपञ्चकवधभयप्रक्षेपाच्चतुर्दश। तत्र पञ्चकसंयोगे भङ्गषट्कमिति प्राग्वद् भङ्गानां चतुरशीतिशतानि। एवं कायपञ्चकवध—जुगुप्साप्रक्षेपेऽपि। यद्वा कायचतुष्टयवध-भय—जुगुप्साप्रक्षेपाच्चतुर्दश। अत्र चतुष्कसंयोगे भङ्गाः पञ्चदशेति प्राग्वदङ्कताडने भङ्गा एकविंशतिसहस्राणि। सर्वमीलने चतुर्दशबन्धहेतुभङ्गा एकोनचत्वारिंशत्सहस्राणि द्वे च शते।

त एव नव कायषट्कवध—भयप्रक्षेपात् पञ्चदश। अत्र षट्कसंयोगे भङ्गैक्यात् प्राग्वदङ्काभ्यासे भङ्गाश्चतुर्दश शतानि। एवं कायषड्वधजुगुप्साप्रक्षेपेऽपि। यद्वा कायपञ्चकवध—भय—जुगुप्साप्रक्षेपे पञ्चदश। अत्र पञ्चकसंयोगे षड्भङ्ग्या भङ्गानां चतुरशीतिशतानि। सर्वे पञ्चदशबन्धहेतुभङ्गा एकादशसहस्राणि शतद्वयं च।

तेष्वेव नवसु कायषट्कवध—भय—जुगुप्साप्रक्षेपे षोडश। तत्र भङ्गाश्चतुर्दशशतानि। सर्वसङ्ख्ययाऽविरतसम्यग्दृष्टौ भङ्गानां लक्षत्रयं द्विपञ्चाशत्सहस्राण्यष्टौ च शतानि। भाविता अविरतसम्यग्दृष्टौ बन्धहेतुभङ्गाः॥

अथ देशविरतेऽष्टादयश्चतुर्दशान्तास्ते ख्याप्यन्ते। तत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देशविरते कायवधाः पञ्च, त्रसकायवधप्रत्याख्यानात् । योगाश्चैकादश, कार्मणौदारिकमिश्राहारकद्विकानामसम्भवात्, इत्यप्रत्याख्यानवर्जेष्वष्टसु बन्धहेतुषु कायवधपञ्चकं पञ्चभिरिन्द्रियाऽसंयमैर्गुण्यते, जाता पञ्चविंशतिः । सा युगलद्विकेन गुण्यते, जाता पञ्चाशत् । तया वेदत्रिकं गुण्यते, लब्धं सार्द्धशतम् । तत् कषायचतुष्टयेन गुण्यते, जातानि षट् शतानि । तान्येकादशभिर्योगैर्गुण्यन्ते, जातानि षट्षष्टिशतानि । एतावन्तोऽष्टबन्धहेतुभङ्गाः ।

त एवाऽष्टौ कायद्वयवधप्रक्षेपान्नव । पञ्चानां च कायानां द्विकसंयोगे भङ्गा दशेति कायस्थाने दशस्थापनया प्राग्वदङ्कगुणने भङ्गानां त्रयोदशसहस्री द्विशती च । अथवा भयप्रक्षेपान्नव । तत्र कायस्थाने पञ्चैवेति भङ्गानां षट्षष्टिशतानि । एवं जुगुप्साप्रक्षेपेऽपि । सर्वे नवबन्धहेतुभङ्गाः चतुःशताधिकषड्विंशतिसहस्राणि ।

त एवाऽष्टौ कायत्रयवधप्रक्षेपाद् दश । पञ्चानां त्रि(क)संयोगे च दशभङ्गीति भङ्गानामिह त्रयोदशसहस्री द्विशती च । अथवा काय[द्वय]वध–भयप्रक्षेपाद् दश । अत्र पञ्चानां द्विसंयोगे भङ्गा दशेति भङ्गानां त्रयोदशसहस्री द्विशती च । एवं कायद्वयवध–जुगुप्साप्रक्षेपेऽपि । एवं भय–जुगुप्साप्रक्षेपाद् दश । तत्र कायस्थाने पञ्चैवेति भङ्गानां षट्षष्टिशतानि । सर्वसङ्ख्यया दशबन्धहेतुभङ्गाः षट्चत्वारिंशत्सहस्राणि शतद्वयाधिकानि ।

त एवाऽष्टौ कायचतुष्टयवधप्रक्षेपादेकादश । अत्र पञ्चानां चतुष्कसंयोगे पञ्च भङ्गाः प्राप्यन्त इति प्राग्वद् गुणने भङ्गाः षट्षष्टिशतानि । [अथवा कायत्रयवध–भयप्रक्षेपादेकादश । अत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कायभङ्गा दशेति प्राग्वद् भङ्गानां त्रयोदशसहस्री द्विशती च। एवं कायत्रयवध–जुगुप्साप्रक्षेपेऽपि। ] अथवा कायत्र(द्व)यवध –भय–जुगुप्सोपादाने एकादश। अत्रापि कायस्थाने दशैवेति भङ्गानां त्रयोदशसहस्री द्विशती च। सर्वसङ्ख्ययैकादशबन्ध-हेतुभङ्गाः षट्चत्वारिंशत्सहस्राणि शतद्वयाधिकानि।

त एवाऽष्टौ कायपञ्चकवधग्रहणे द्वादश। तत्र पञ्चानां पञ्चसंयोगे भङ्ग एक इति प्राग्वदङ्काभ्यासे भङ्गानां त्रयोदश-शतानि विंशत्युत्तराणि। यद्वा कायचतुष्टवध[भय]प्रक्षेपाद् द्वादश। तत्र पञ्चानां चतुष्कसंयोगे भङ्गाः पञ्चेति प्राग्वदङ्काभ्यासे भङ्गानां षट्षष्टिशतानि। एवं कायचतुष्टवध–जुगुप्साप्रक्षेपेऽपि। अथवा कायत्रयवध–जुगुप्सा–भयप्रक्षेपे द्वादश। तत्र पञ्चानां त्रिकसंयोगे दशेति त्रयोदशसहस्री द्विशती च भङ्गानाम्। सर्वसङ्कलने द्वादशबन्धहेतुभङ्गाः सप्तविंशतिसहस्राणि सप्तशतानि विंशतिश्च।

त एवाऽष्टौ कायपञ्चकवध–भयप्रक्षेपात् त्रयोदश। अत्र पञ्चानां पञ्चकसंयोगे भङ्ग एक इति भङ्गानां त्रयोदशशतानि विंशतिश्च। एवं कायपञ्चकवध–जुगुप्साप्रक्षेपेऽपि। यद्वा काय-चतुष्टयवध–भय–जुगुप्सोपादाने त्रयोदश। तत्र कायस्थाने पञ्चेति भङ्गानां षट्षष्टिशतानि। सर्वसङ्ख्यया त्रयोदशबन्ध-हेतुभङ्गा द्विनवतिशतानि चत्वारिंशच्च।

त एवाऽष्टौ कायपञ्चकवध–भय–जुगुप्साप्रक्षेपाच्चतुर्दश। तत्र कायस्थाने एक इति भङ्गास्त्रयोदशशतानि विंशतिश्च। सर्वसङ्ख्यया देशविरतबन्धहेतुभङ्गा लक्षमेकं त्रिषष्टिसहस्राणि षट्शती चाऽशीत्यधिका। उक्ता देशविरते बन्धहेतुभङ्गाः॥

अथ ते प्रमत्ते प्रोच्यन्ते। तत्र द्वयोरन्यतरद् युग

त्रयाणामन्यतमो वेदश्चतुर्णामेकतमः संज्वलनः, कार्मणौदारिकमिश्ररहितानां त्रयोदशानामन्यतमो योग इति जघन्यतः पञ्च बन्धहेतवः। मिथ्यात्वाऽविरतिभेदश्च कोऽप्यत्र नाऽस्ति। ततस्त्रिभिर्वेदैस्त्रयोदश योगान् गुणयेज्जाता एकोनचत्वारिंशत्। ततो रूपद्वयमपनीयते, स्त्रीवेदोदये आहारकाहारकमिश्राऽसम्भवात्; स्त्रीणां दृष्टिवादाध्ययनप्रतिषेधात्। ततः स्थिताः शेषाः सप्तत्रिंशत्, तैर्युगलद्विकं गुण्यते, जाताश्चतुःसप्ततिः। तैश्चत्वारः कषाया गुण्यन्ते, जातं षण्णवत्यधिकं शतद्वयम्। एतावन्तः प्रमत्ते पञ्चबन्धहेतुभङ्गाः।

त एव भयप्रक्षेपात् षड्। भङ्गाः तत्र तावन्त एव २९६। एवं जुगुप्सोपादानेऽपि। त एव पञ्च भय–जुगुप्साप्रक्षेपात् सप्त। भङ्गास्तत्र तावन्त एव २९६। सर्वे प्रमत्तसंयते बन्धहेतुभङ्गा एकादश शतानि चतुरशीतिश्च। भाविताः प्रमत्ते संयते बन्धहेतुभङ्गाः॥

अथाऽप्रमत्ते भाव्यन्ते। तत्र जघन्यतः पञ्च। त्रयाणामन्यतमो वेदः, कार्मणौदारिकमिश्र–वैक्रियमिश्राहारकमिश्ररहितानामेकादशानामन्यतमो योगः, द्वयोरन्यतरद् युगलं, चतुर्णामन्यतमः संज्वलनश्चेति। अत्र त्रिभिर्वेदैर्योगा एकादश गुण्यन्ते, जातास्त्रयस्त्रिंशत्। तत एकं रूपमपनीयते, स्त्रीवेदोदये आहारकयोगाऽसम्भवात्; स्थिता द्वात्रिंशत्। ते युगलद्वयेन गुण्यन्ते; जाताश्चतुःषष्टिः। ते कषायचतुष्टयेन गुण्यन्ते, जातं षट्पञ्चाशं शतद्वयम्। इयन्तोऽप्रमत्ते पञ्च बन्धहेतुभङ्गाः।

त एव पञ्च भयेन सह षड्। भङ्गास्तावन्त एव २५६। अथवा जुगुप्सया सह षड्, भङ्गास्तावन्त एव २५६। सर्वे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षड्बन्धहेतुभङ्गाः शतानि पञ्च द्वादशोत्तराणि। त एव पञ्च जुगुप्सा–भयप्रक्षेपे सप्त। भङ्गास्तावन्त एव २५६। सर्वेऽ-प्रमत्ते बन्धहेतुभङ्गाश्चतुर्विंशत्यधिकं सहस्रम्। भाविता अप्रमत्ते बन्धहेतुभङ्गाः॥

अथ चाऽपूर्वकरणे ते भाव्यन्ते। तत्र च वैक्रियाऽऽ-हारकयोरप्यसम्भवाद् योग नेव (योगा नव)। तत्र त्रयाणा-मन्यतमो वेदो नवानामन्यतमो योगो द्वयोरन्यतरद् युगलं चतुर्णामन्यतरः संज्वलन इति जघन्यतोऽमी पञ्च बन्धहेतवः। तत्र वेदत्रयस्य योगनवकेन गुणने सप्तविंशतिर्भङ्गाः। तैर्युगल-द्वयगुणने चतुःपञ्चाशत्। तैः कषायचतुष्टयगुणने द्वे शते षोडशोत्तरे। इयन्तोऽपूर्वकरणे पञ्चबन्धहेतुभङ्गाः।

त एव पञ्च भयप्रक्षेपात् षट्। भङ्गास्तत्रापि तावन्त एव २१६। एवं जुगुप्साप्रक्षेपेऽपि २१६। सर्वे षड्बन्ध-हेतुभङ्गाश्चत्वारि शतानि द्वात्रिंशच्च। त एव [पञ्च] भय–जुगुप्साक्षेपे सप्त। भङ्गाः प्रागुक्तमानाः २१६। सर्वसङ्कल-नयाऽपूर्वकरणेऽष्टौ शतानि चतुःषष्टिर्भङ्गाः। निगदिता अपूर्व-करणे बन्धहेतुभङ्गाः॥

अथाऽनिवृत्तिबादरे ते निगद्यन्ते। तत्र जघन्यपदे द्वौ बन्धहेतू। चतुर्णामन्यतमः संज्वलनो नवानामन्यतमो योग-श्चेति। अत्र चतुर्णां नवभिर्गुणने षट्त्रिंशद् भङ्गाः। उत्कृष्ट-पदे त्रयो बन्धहेतवः। तत्र द्वौ प्रागुक्तावेव, तृतीयस्त्वन्यतमो वेदः। अनिवृत्तिबादरो हि यावत् पुंवेद–संज्वलनचतुष्करूप-प्रकृतिपञ्चकबन्धकस्तावद्वेदोदयोऽपि तस्याऽस्तीति। ततः षट्-त्रिंशद् वेदत्रयेण गुण्यन्ते, जातमष्टोत्तरं शतम्। सर्वेऽप्यनि-वृत्तिबादरे भङ्गाश्चतुश्चत्वारिंशं शतम्॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूक्ष्मसम्पराये एक एव किट्टीकृतसंज्वलनलोभाख्यः कषाये, योगाश्च सम्भविनो नवेति नवैव भङ्गाः ॥

उपशान्तमोह–क्षीणमोहयोश्च नवैव योगा बन्धहेतवः । एकदा चैक एव योग इति नवैव भङ्गाः ॥

सयोगिनो योगाः सप्त सम्भव[न्ति] इति सप्तैव भङ्गाः ॥

सर्व गुणस्थानेषु भङ्गसङ्ख्या षट्चत्वारिंशल्लक्ष(क्षाः?) द्व्यशीतिसहस्राणि सप्त सहस्राणि (शतानि) च सप्तत्यधिकानि ४६८२७७० । तदुक्तं पञ्चसङ्ग्रहे—

"सव्वगुणठाणगेसु विसेसहेऊण इत्तिया संखा ।
छायाललक्ख–बासी–सहस्स सयसत्त सत्तरि य ॥"

यदि चैकद्व्यादयो जीवघातभेदा न गृह्यन्ते, किन्त्वेक-द्विकादिघातभेदा एव, तदैकादिषडन्तवधेषु षट्–पञ्चदश–षडेक-संयोगजभेदसम्भवान्मिथ्यात्वभेदानां पञ्चानां कायबंध(वध)-भेदत्रिषष्ट्या गुणने त्रिशती पञ्चदशोत्तरा । तस्याः पञ्चभिरि-न्द्रियाऽसंयमैर्गुणने पञ्चदशशती पञ्चसप्तत्युत्तरा । तस्या युग लद्वयेन गुणने त्रिसहस्री शतमेकं च पञ्चाशदुत्तरम् । तद्राशे-स्त्रिभिर्वेदैर्गुणने नवसहस्री चतुःशती पञ्चाशच्च । तद्राशेश्चतुर्भिः कषायैर्गुणने सप्तत्रिंशत्सहस्राण्यष्ट शतानि च । तेषां दशभि-र्योगैर्गुणने लक्षत्रयमष्टसप्ततिसहस्राणि च । इत्येतावन्तो मिथ्या-दृष्टौ नवबन्धहेतुभङ्गा भवन्ति । अग्रे च भय–जुगुप्साऽन-न्तानुबन्धिसंचारणे द्वादशान्ता एव भेदा विश्रामन्ति । एव-मग्रेऽपि यथायथमभ्यूह्यम् । तदेवमुक्ता गुणस्थानेषु युगपद्-भाविबन्धहेतुभङ्गसङ्ख्या ॥

अथ जीवस्थानेषु युगपद्भाविबन्धहेतुभङ्गसङ्ख्या पूर्वोक्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिशाऽभिधीयते। तत्र संज्ञिपञ्चेन्द्रियः पर्याप्तो गुणस्थानग्रहणेनैव गृहीतः। अपर्याप्ता(प्त)संज्ञिनश्च जघन्यतश्चतुर्दश बन्धहेतव उत्कृष्टतोऽष्टादश। तत्र जघन्यतश्चतुर्दश सम्यग्दृष्टेरमी–षट्कायवध एकः, संज्ञिपर्याप्तव्यतिरिक्तानां सर्वेषां सर्वदा षट्कायवधस्याऽविशिष्टस्य प्रतिपादनात्। कथं तर्हि मिथ्यादृष्ट्यादिष्वेतद्भङ्गप्ररूपणा कृता, षडपि कायान् प्रति सर्वदा तेषामप्यविरतत्वात्?। नैष दोषः। संज्ञिनो हि समनस्काः; ततस्तेषां भवत्येतादृशः कदाचित्तीव्र–तीव्रतरः परिणामविशेषः "अयमेको घात्य इमौ द्वौ घात्याविमे त्रयो घात्या" इत्यादिः। तदपेक्षयैककद्विकादिसंयोगतो भङ्गप्ररूपणा घटते। इह तु मनोरहितत्वात् षट्कायवध एव विशेषतो ग्राह्य इति। तथा पञ्चानां मध्येऽन्यतम इन्द्रियाऽसंयमो द्वयोरन्यतरद् युगलं त्रयाणामन्यतमो वेदः, अनन्तानुबन्धिवर्जानां कषायाणामन्यतमक्रोधादित्रिकम्। योगाश्चात्र सम्भविनः पञ्च; संज्ञिनोऽपर्याप्तस्य सम्यग्दृष्टेर्मिथ्यादृष्टेर्वा शरीरपर्याप्तेरर्वाक् कार्मणौदारिकमिश्र-वैक्रियमिश्ररूपाणां त्रयाणामेव योगानां, शरीरपर्याप्तेरूर्ध्वं तु शेषपर्याप्त्यपेक्षयाऽपर्याप्तस्य देव–नरकापेक्षया वैक्रियस्य तिर्यग्मनुष्यापेक्षया चौदारिकस्य सम्भवात्; ततः पञ्चानां योगानामन्यतमो योगः। अङ्कस्थापनाः– ४, २, ५, [५,] ३, १। अमीषां चाऽङ्कानां परस्पराभ्यासे जातानि चत्वारिंशदधिकानि चत्वारि शतानि। एतावन्तः संज्ञिनोऽपर्याप्तस्य सम्यग्दृष्टेश्चतुर्दशबन्धहेतुभङ्गाः। त एव चतुर्दश भयप्रक्षेपात् पञ्चदश। तत्रापि तावन्त एव भङ्गाः ४४०। एवं जुगुप्साप्रक्षेपेऽपि। त एव चतुर्दश भय–जुगुप्साप्रक्षेपात् षोडश। तत्रापि तावन्त एव भङ्गाः। सर्वसङ्ख्ययाऽविरतसम्यग्दृष्टेः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संज्ञा(ज्ञ्य)पर्याप्तस्य बन्धहेतुभङ्गाः सप्तदशशतानि षष्ट्यधिकानि ।

सासादनस्य संज्ञा(ज्ञ्य)पर्याप्तस्य योगाः कार्मणौदारिकमिश्रवैक्रियमिश्ररूपास्त्रय एव । न च सासादनभावेऽपि शरीरपर्याप्त्या पर्याप्तस्याऽन्यपर्याप्तिभिरपर्याप्तस्यौदारिक वैक्रिययोगावपि किं न स्त इति शङ्कनीयम् । शरीरपर्याप्तिसमाप्तिवेलायां सासादनत्वाऽयोगात्; तस्या अन्तर्मुहूर्तेन परिसमाप्तेः । संज्ञिव्यतिरिक्तानां सासादनत्वस्य चाऽपर्याप्तावस्थायां षडावलिकामात्रकालमेव सम्भविनस्तदर्वागेवाऽपगमाज्जघन्यपदेऽप्यस्य बन्धहेतवः पञ्चदश, अनन्तानुबन्धिप्रक्षेपात् । तत्र वेदत्रिकेण योगत्रिकं गुण्यते, जाता नव । ततः सासादने रूपमेकमपनेयमुक्तमिति स्थिता अष्टौ । तैः पञ्चेन्द्रियाऽसंयमा गुण्यन्ते, जाताश्चत्वारिंशत् । तैर्युगलद्विकं गुण्यते, जाता अशीतिः । तैः कषायचतुष्टयगुणने जातानि त्रीणि शतानि विंशत्यधिकानि । एतावन्तः संज्ञ्यपर्याप्तस्य सासादनस्य पञ्चदशबन्धहेतुभङ्गाः । त एव पञ्चदश भयप्रक्षेपात् षोडश, भङ्गास्तावन्त एव । एवं जुगुप्साप्रक्षेपेऽपि । उभयक्षेपे सप्तदश, भङ्गास्तावन्त एव । सर्वे संज्ञ्यपर्याप्तसासादनस्य बन्धहेतुभङ्गा द्वादशशतान्यशीत्यधिकानि ।

मिथ्यादृष्टेः संज्ञ्यपर्याप्तस्य जघन्यपदे बन्धहेतवः षोडश; मिथ्यात्वप्रक्षेपात् । अत्र च मिथ्यात्वमेकमेव, त्रयोदशानामपि जीवानामेकस्यैवाऽनाभोगिकमिथ्यात्वस्य भणनात् । योगाश्च पञ्चेति वेदत्रयेण योगत्रय(? पञ्चक)गुणने जाताः पञ्चदश । तैरिन्द्रियाऽसंयमपञ्चकगुणने पञ्चसप्ततिः । तया युगलद्विकताडने सार्द्धं शतम् । तेन कषायचतुष्टयगुणने षट् शतानि । एतत्-

वन्तो मिथ्यादृष्टेः संज्ञ्यपर्याप्तस्य षोडशबन्धहेतुभङ्गाः । त एव षोडश भयप्रक्षेपात् सप्तदश । तत्रापि तावन्त एव भङ्गाः । एवं जुगुप्साक्षेपेऽपि । उभयप्रक्षेपेऽष्टादश । तत्रापि त एव भङ्गाः । सर्वसङ्ख्यया चतुर्विंशतिशतानि ।

संज्ञ्यपर्याप्ते एतदेव गुणस्थानत्रयं भवति, नाधिकम् । तद्भाविनः सर्वे भङ्गाश्चत्वारिंशदधिकानि चतुःपञ्चाशच्छतानि ॥

असंज्ञिपञ्चेन्द्रियस्याऽपर्याप्तस्य मिथ्यात्व–सासादनलक्षणं गुणस्थानद्वयं सम्भवति । बादरैकेन्द्रिय–विकलेन्द्रियाऽसंज्ञिपञ्चेन्द्रियाणामपर्याप्तानामेतद्गुणस्थानद्वयस्यैव प्रतिपादनात् । तत्राऽपर्याप्ताऽसंज्ञिपञ्चेन्द्रियस्य सासादनत्वे जघन्यपदे पञ्चदश बन्धहेतवः । षट्कायवधोऽन्यतरेन्द्रियाऽसंयमोऽन्यतरयुगलमन्यतमवेदोऽनन्तानुबन्ध्याद्यन्यतमक्रोधादिचतुष्टयं कार्मणौदारिकमिश्रयोरन्यतरो योगश्चेति । अत्र प्राग्वन्मिथोऽङ्कानां गुणने भङ्गानां द्विशती चत्वारिंशदधिका । भयप्रक्षेपाज्जुगुप्साप्रक्षेपाद्वा षोडशसूभयप्रक्षेपाच्च सप्तदशस्वपि प्रत्येकमियन्त एव भङ्गाः । सर्वसङ्ख्यया सासादने नवशती षष्ट्यधिका ।

मिथ्यादृष्टित्वे च मिथ्यात्वप्रक्षेपाज्जघन्यपदे षोडश, योगाश्च तत्र त्रय इति प्राग्वदङ्कानां गुणने भङ्गानां त्रिशती षष्ट्यधिका । सैव भयक्षेपाज्जुगुप्साक्षेपाद्वा सप्तदशसु, उभयप्रक्षेपादष्टादशस्वपि चेति सर्वसङ्ख्यया मिथ्यादृष्टित्वे भङ्गानां चतुर्दशशती चत्वारिंशदधिका । सर्वसङ्कलनया गुणस्थानद्वयेऽपर्याप्ताऽसंज्ञिपञ्चेन्द्रियस्य बन्धहेतुभङ्गाश्चतुर्विंशतिशतानि ॥

पर्याप्तस्याऽसंज्ञिपञ्चेन्द्रियस्य मिथ्यात्वलक्षणमेकमेव गुणस्थानम् । पर्याप्ताऽपर्याप्तसूक्ष्म–पर्याप्तबादरैकेन्द्रिय–विकलेन्द्रियाऽसंज्ञिपञ्चेन्द्रियेष्वेकस्यैव गुणस्थानकस्य प्रतिपादनात् । ततो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽस्य जघन्यपदे षोडश बन्धहेतवः – मिथ्यात्वं षट्कायवधः पञ्चानामन्यतम इन्द्रियाऽसंयमो द्वयोरन्यतरद् युगलं अनन्तानुबन्ध्याद्यन्यतमक्रोधादिचतुष्टयं त्रयाणामन्यतमो वेदो द्वयोरौदारिकाऽसत्यामृषाभाषारूपयोर्योगयोरन्यतरो योगः । अत्र प्राग्वदङ्कगुणने भङ्गानां चत्वारिंशदधिका शतद्वयी । सैव भयक्षेपाज्जुगुप्साक्षेपाद्वा सप्तदशसु, उभयक्षेपादष्टादशस्वपि च, सर्वसङ्ख्यया पर्याप्ताऽसंज्ञिपञ्चेन्द्रियस्य नवशती षष्ट्यधिका ॥

चतुरिन्द्रियस्याऽपर्याप्तस्य सासादनस्य जघन्यपदे पञ्चदश बन्धहेतवः । षट्कायवधश्चतुर्णामिन्द्रियाऽसंयमानामेकोऽसंयमो युगलमन्यतरद् वेद एक एव नपुंसकाख्यः । यद्यपि संज्ञिपञ्चेन्द्रियव्यतिरिक्ताः सर्वेऽपि नपुंसका एव, तथाप्यसंज्ञिपञ्चेन्द्रियाः स्त्रीपुंसलिङ्गाकारमात्रमधिकृत्य स्त्रीवेदे पुंवेदेऽपि च प्राप्यन्त इति तत्र त्रयो वेदा गृहीताश्चतुरिन्द्रियादीनां तु बाह्यस्त्रीपुंसलिङ्गाकारमात्रमपि न विद्यत इतीह नपुंसकवेद एव ग्राह्यः । अनन्तानुबन्ध्यादीनामन्यतमक्रोधादिचतुष्टयं कार्मणौदारिकमि(श्र)योरन्यतरो योगः । ततोऽङ्कताडनया जाताश्चतुःषष्टिः पञ्चदशबन्धहेतुभङ्गाः । एत एव भयप्रक्षेपाज्जुगुप्साप्रक्षेपाद्वा षोडशसु, उभयप्रक्षेपात् सप्तदशस्वपि च । सर्वसङ्ख्यया चतुरिन्द्रियापर्याप्तस्य सासादनस्य द्विशती षट्पञ्चाशदधिका ।

मिथ्यादृष्टेरपर्याप्तचतुरिन्द्रियस्य जघन्यपदे षोडश, मिथ्यात्वप्रक्षेपात् । योगाः कार्मणौदारिकमिश्रौदारिकरूपास्त्रयः । ततोऽङ्कताडने भङ्गाः षण्णवतिः । इयन्त एव भयक्षेपाज्जुगुप्साक्षेपाद्वा सप्तदशसूभयक्षेपादष्टादशस्वपि च । सर्वाग्रं चतुरशीत्यधिकं शतत्रयम् । गुणस्थानकद्वयेऽपि सर्वसङ्ख्ययाऽपर्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्तचतुरिन्द्रियस्य बन्धहेतुभङ्गाः षट्शतानि चत्वारिंशच्च ॥

पर्याप्तचतुरिन्द्रियस्य जघन्यपदे षोडश बन्धहेतवः— मिथ्यात्वं षट्कायवधश्चतुर्णामिन्द्रियाऽसंयमानामेक इन्द्रियाऽसंयमो द्वयोरन्यतरद् युगलं अनन्तानुबन्ध्यादीनामन्यतमक्रोधादिचतुष्टयं नपुंसकवेद औदारिकाऽसत्यामृषाभाषयोरन्यतरो योगश्चेति । तत्र प्राग्वदङ्कगुणने भङ्गाश्चतुःषष्टिः । एत एव भयक्षेपाज्जुगुप्साक्षेपाद्वा सप्तदशसु भयक्षेपादष्टादशस्वपि च । सर्वे पर्याप्तचतुरिन्द्रियभङ्गा द्वे शते षट्पञ्चाशदधिके । सर्वसङ्ख्यया चतुरिन्द्रियाणां बन्धहेतुभङ्गाः षण्णवत्यधिकान्यष्टौ शतानि ।

त्रीन्द्रियस्याऽपर्याप्तस्य सासादनस्य जघन्यपदे पञ्चदशबन्धहेतवस्ते च प्राग्वद् वाच्याः । नवरमत्र त्रयाणामिन्द्रियाऽसंयमानामन्यतमो ग्राह्यः । ततोऽङ्कताडने भङ्गा अष्टचत्वारिंशत् । तावन्त एव भयप्रक्षेपाज्जुगुप्साक्षेपाद्वा षोडशसु भयप्रक्षेपात् सप्तदशस्वपि च । सर्वेऽपि त्रीन्द्रियापर्याप्तस्य सासादनस्य बन्धहेतुभङ्गाद्विनवंत (द्विनवत्युत्तरं) शतम् ।

मिथ्यादृष्टेरपर्याप्तस्य त्रीन्द्रियस्य जघन्यपदे षोडश बन्धहेतवो मिथ्यात्वप्रक्षेपात् । योगाश्चात्र कार्मणौदारिक [मिश्रौदारिक]रूपास्त्रयः । ततः प्राग्वदङ्कगुणने भङ्गा द्विसप्ततिः । तावन्त एव भयक्षेपाज्जुगुप्साक्षेपाद्वा सप्तदशसु भयक्षेपादष्टादशस्वपि च । सर्वेऽपि मीलिता द्वे शते अष्टाशीत्यधिके । गुणस्थानकद्वयेऽप्यपर्याप्तत्रीन्द्रियस्य सर्वसङ्ख्यया बन्धहेतुभङ्गाश्चत्वारि शतान्यशीत्यधिकानि ॥

पर्याप्तत्रीन्द्रियस्य जघन्यपदे षोडश बन्धहेतवः । तत्र भङ्गा अष्टचत्वारिंशत् । तावन्त एव भयक्षेपाज्जुगुप्साक्षेपाद्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सप्तदशसु भयक्षेपादष्टादशस्वपि च । सर्वे पर्याप्तत्रीन्द्रियबन्धहेतुभङ्गा द्विनवतं शतम् १९२ । सर्वसङ्ख्यया त्रीन्द्रियेषु भङ्गा द्विसप्तत्यधिकषट्शतानि ॥

द्वीन्द्रियाऽपर्याप्तस्य सासादनस्य जघन्यपदे पञ्चदश बन्धहेतवस्ते च प्राग्वन्नवरमत्र द्वयोरिन्द्रियाऽसंयमयोरन्यतरोऽसंयमो वक्तव्यः । तत्र प्राग्वदङ्कानां गुणने जाता द्वात्रिंशत् । तावन्त एव भयक्षेपाज्जुगुप्साक्षेपाद्वा षोडशसु भयक्षेपात् सप्तदशस्वपि च । सर्वसङ्ख्यया द्वीन्द्रियाऽपर्याप्तसासादनस्य बन्धहेतुभङ्गा अष्टाविंशं शतम् ।

मिथ्यादृष्टेरपर्याप्तद्वीन्द्रियस्य जघन्यपदे षोडश बन्धहेतवो मिथ्यात्वप्रक्षेपात् । योगाश्चात्र त्रय इति प्राग्वदङ्कगुणनेऽष्टचत्वारिंशत् । इयन्त एव भयक्षेपाज्जुगुप्साक्षेपाद्वा सप्तदशसु भयक्षेपादष्टादशस्वपि च । सर्वे मीलिता द्विनवतं शतम् । गुणस्थानद्वये द्वीन्द्रियाऽपर्याप्तस्य त्रिशती विंशत्यधिका ॥

पर्याप्तद्वीन्द्रियस्य जघन्यपदे षोडश बन्धहेतवस्ते च प्राग्वन्नवरमौदारिकाऽसत्यामृषाभाषयोरन्यतरो योग इह वाच्यः । ततः प्राग्वदङ्कताडने लब्धा द्वात्रिंशत् । इयन्त एव भयक्षेपाज्जुगुप्साक्षेपाद्वा सप्तदशसु भयक्षेपादष्टादशस्वपि च भङ्गाः । सर्वे पर्याप्तद्वीन्द्रियबन्धहेतुभङ्गा अष्टाविंशं शतम् । सर्वे द्वीन्द्रियहेतुभङ्गाश्चत्वारि शतान्यष्टचत्वारिंशदधिकानि ॥

बादरैकेन्द्रियस्याऽपर्याप्तस्य सासादनस्य जघन्यपदे पञ्चदश बन्धहेतवस्ते च प्राग्वन्नवरमत्रैकः स्पर्शनेन्द्रियाऽसंयमो वक्तव्यः । ततः प्राग्वदङ्कानां गुणने भङ्गाः षोडश । इयन्त एव भयस्य जुगुप्साया वा क्षेपे षोडशसु भयक्षेपे सप्तदशस्वपि च । सर्वे मिलिताश्चतुःषष्टिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिथ्यादृष्टेरपर्याप्तबादरैकेन्द्रियस्य जघन्यपदे षोडश बन्धहेतवो मिथ्यात्वप्रक्षेपात्। नवरमत्र कार्मणौदारिकमिश्रौदारिकामन्यतमो योग इति वक्तव्यम्। ततः प्राग्वदङ्कगुणने भङ्गाश्चतुर्विंशतिः। इयन्त एव भयस्य जुगुप्साया वा क्षेपे सप्तदशसूभयक्षेपेऽष्टादशस्वपि च। सर्वे समुदिताः षण्णवतिः॥

पर्याप्तबादरैकेन्द्रियस्य जघन्यतः षोडश बन्धहेतुभङ्गाः (हेतवः) तत्र भङ्गाश्चतुर्विंशतिः। इयन्त एव भयस्य जुगुप्साया वा क्षेपे सप्तदशसूभयक्षेपादष्टादशस्वपि च। सर्वे समुदिताः षण्णवतिः। सर्वसङ्ख्यया बादरैकेन्द्रियाणां भङ्गानां द्विशती षट्पञ्चाशदधिका॥

सूक्ष्मैकेन्द्रियस्याऽपर्याप्तस्य जघन्यपदे षोडश [बन्धहेतवः]। तत्र भङ्गाश्चतुर्विंशतिः। तावन्त एव भयस्य जुगुप्साया वा क्षेपे सप्तदशसूभयक्षेपादष्टादशस्वपि च। सर्वे समुदिताः षण्णवतिः।

पर्याप्तसूक्ष्मैकेन्द्रियस्य जघन्यपदे षोडश। ते चाऽपर्याप्तवदेव। परमिह योग औदारिकरूप एक एव वाच्यस्ततो भङ्गा अष्टौ। तावन्त एव भयस्य जुगुप्साया वा क्षेपे सप्तदशसूभयक्षेपेऽष्टादशस्वपि च। सर्वे मिलिता द्वात्रिंशत्। सर्व सङ्ख्यया सूक्ष्मैकेन्द्रियाणां बन्धहेतुभङ्गा अष्टाविंशं शतम्॥

तदेवमुक्ता गुणस्थानेषु [जीवस्थानेषु] च बन्धहेतुभङ्गाः॥

* * *

हेतुत्वमिह प्रकृति–प्रदेशसामान्य एव योगानाम्।
स्थिति–र[स]सामान्ये तु, प्रोक्तं कुशलैः कषायाना(णा)म् ॥१॥
व्यतिरेकान्वयदृष्टेः प्रकृतिविशेषे तु हेतुभेद इति।
प्रकृतीनां षोडशकं मिथ्यात्वनिमित्तकं प्रोक्तम् ॥२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जातिचतुष्टय–नरकत्रिक–मिथ्यात्वानि हुण्डसेवार्त्ते ।
स्थावरचतुष्कमातप–तृतीयवेदाश्च षोडशकम् ॥३॥

मनुज–स्त्यानर्द्धित्रिक ३[मपि तिर्यक्त्रिक]मनाद्यचरमानि ।
संस्थानक४संहनना४न्युद्योतादासुखगती (?शुभखगति) च ॥४॥
नीचैर्गोत्रौदारिक–युगलकषायाष्टकाङ्गनावेदाः ।
वज्रर्षभमिति पञ्च–त्रिंशदिहाऽसंयमनिमित्ताः ॥५॥

बध्यन्ते[च]कषायै–रवशिष्टाः प्रकृतयोऽष्टषष्टिरिह ।
योगैस्तु सातवेद्यं तथैव नियमोपलम्भेन ॥६॥

उक्तं च पञ्चसङ्ग्रहे —
" सोलस मिच्छणिमित्ता बज्झइ पणतीस अविरईए उ ।
सेसा उ कसाएहिं जोगेहि य सायवेयणियं ॥ "
चतुरादिप्रत्ययती(ता), सीतां(साता)दौ यातु भाषिताऽन्यत्र ।
सा तु तृणारणिमणिवद् विकल्पमाश्रित्य बोद्धव्या ॥७॥
तथा चोक्तं षडशीतिके –
" चतुमिच्छमिच्छअविरइ–पच्चइया सायसोलपणतीसा ।
जोगविण तिपच्चईया–हारगजिणव[ज्ज] सेसाउ ॥ "
तीर्थकराऽऽहारकयो–र्बन्धे सम्यक्त्वसंयमौ हेतू ।
इति वस्तुस्थितिरत्रा–ऽनुपपत्तिं भावयन्ति परे ॥८॥
सम्यक्त्वमौपशमिकं तीर्थंकरनामबन्धहेतुश्चेत् ।
तद्बन्धस्तद्भावात् स्यात्तर्ह्युपशान्तमोहेऽपि ॥९॥
क्षायिकसम्यक्त्वं चे–ज्जिननाम्नो बन्धकं तदा बन्धः ।
सिद्धानामपि तस्य प्रसज्यते तद्वतां सततम् ॥१०॥
क्षायोपशमिकमीदृश–मिदमिति चेत्तर्ह्यपूर्वकरणस्य ।
प्रथमसमयेऽपि हि भवे–त्तद्बन्धस्य व्यवच्छेदः ॥११॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षायोपशमिकदर्शन–विच्छेदो ह्याद्यसमयभावीष्टः ।
जिननाम्नो बन्धस्य त्वपूर्वकरणस्य षष्ठांशे ॥१२॥

तन्न किमपि सम्यक्त्वं जिननाम्नो बन्धकारणं घटते ।
कारणमाहारकयुग–बन्धस्य न संयमोऽप्येवम् ॥१३॥

सामान्येन तथात्वे तस्य भवेत् स प्रमत्तदमिनोऽपि ।
ग्राह्येऽप्रमत्तभावे त्वपूर्वषड्भागपरतोऽपि ॥१४॥

अत्र वदन्त्यनयोरपि कषायस(भे)दा हि कारणं मौलम् ।
सम्यक्त्वसंयमौ पुन–रेषां सहकारितां धत्तः ॥१५॥

ते चारभ्य चतुर्थाद् गुणाश्रयात् सप्तमाच्च वर्त्तते(न्ते) ।
नियता भेदा अर्वागपूर्वकरणस्य षष्ठांशात् ॥१६॥

सम्यक्त्वानुगतास्ते बन्धाय स्युः प्रशस्ततां नीताः ।
सकलजगदुद्दिधीर्षा–दिसङ्गतास्तीर्थकरनाम्ना(?म्नः) ॥१७॥

तथा हि–लोचनलाभसमानं सम्यक्त्वं प्राप्य चिन्तयति धीमान् ।
मोहांध्रकरे(मोहान्धकार) गहने संसारे के न दुःखार्त्ताः ? ॥१८॥

सत्त्वा भ्रमन्ति सत्य–प्यस्मिन् सद्धर्मतेजसि हताशाः ।
कृच्छ्रादस्मादेनांस्तदनेनोत्तारयामीति ॥१९॥

करुणादिगणोपेतः परार्थकरणप्रवर्द्धमानमनाः ।
स तथैव चेष्टमानः परार्थकृत्तीर्थकृद् भवति ॥२०॥

यस्तु स्वजनादिगतं ध्यायत्येवं तथाऽनुतिष्ठति च ।
सावधिकपरार्थरतः स तु धीमान् गणधरो भवति ॥२१॥

स्वयमेव निर्यियासति भवनैर्गुण्योपलम्भतो यस्तु ।
स तु मुण्डकेवली स्या–दात्मैकार्थप्रवृत्तिगुणः ॥२२॥

प्रणिधिप्रवृत्तिविघ्नजय–सिद्धिविनियोगचरणशुद्धिभवाः ।
बन्ध(न्धं?) कषायभेदाः कुर्वन्त्याहारकयुगस्या ॥२३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु च विशेषाश्रयणे संयमसम्यक्त्वयोः क इव मन्तुः ।
यत् सकषायेऽविष्टो नेष्टः सम्यक्त्वसंयमयोः ? ॥२४॥
सत्यं निश्चयनयतो हेतुर्मोक्षस्य नैव बन्धस्य ।
तेन जिनाऽऽहारकयो–र्बन्धकतेष्टा कषायेषु ॥२५॥
व्यवहारनये त्विष्टं संयमसम्यक्त्वयोरपि तथात्वम् ।
येन घृतं दहतीतिव–दुपचारस्तत्र सम्भवति ॥२६॥
शुद्धनयानुगृहीत–व्यवहारनयस्य चेदमाकूतम् ।
स्वैरी त्वयमाश्रयते–ऽतिशयं सम्यक्त्वसंयमयोः ॥२७॥
नयभेदाद् वाग्भेदो न च दुष्यति कोऽपि शास्त्रकाराणाम् ।
पार्श्वापत्यस्थविर–प्रतिवचनानां विभेद इव ॥२८॥
योगेष्वेव विशेषं वाञ्छन्त्यन्ये तु तारतम्येन ।
फलभेदात्तद्भेदा–न्न [ हि ? ] वचनोपग्रहस्तत्र ॥२९॥
उक्ता बन्धहेतवः ॥

*　*　*

बद्धस्य कर्मणः स्या–दुदय(:) तस्मात् परीषहा दमिनः ।
उपतिष्ठन्त इतीमे कीर्त्यन्ते ये यथारूपाः ॥१॥
क्षुदुदन्योष्णं शीतं शय्यारोगौ वधस्तृणस्पर्शः ।
चर्या मलदंशौ चे–त्येकादश वेदनीयभवाः ॥२॥
निरवद्याहारस्या–ऽलाभे क्षुद्वेदनाऽतिरेकेऽपि ।
स्वाध्यायध्यानभृत–स्त्यजतश्चाऽकालभिक्षेच्छाम् ॥३॥
अन्यूनयतो योगा–नगृह्णतोऽनेषणीयपिण्डं च ।
यददैन्यात् क्षुत्सहनं क्षुधापरीषहजयः स मतः ॥४॥
एवमुदन्याविजयो–ऽप्युष्णपरीषहजयस्तु तस्य मतः ।
यो निश्छायाटव्यां गच्छन् ग्रीष्मे महाभीष्मे ॥५॥
शुष्कगलतालुरसनो–ऽप्यतिदाहहतस्तपोविशेषेण ।
प्राणिदयाधृतबुद्धि–र्जलावगाहादि नातनुते ॥६॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

पतति महत्यपि शीते त्यक्त्वाऽकल्प्यांशुकः समयविधिना ।
कल्प्याम्बरपरिभोगी खगवदक्लप्तालयविशेषः ॥७॥
शीताभि[नि]संपी(पा)ते-ऽप्यनभीप्सिततत्प्रतिक्रियोपायः ।
संसहते यच्छीतं शीतपरीषहजयः स मतः ॥८॥
खरविषमकर्करेषु क्षितिप्रदेशेषु सुमृदुपट्टे वा ।
निद्रां विधिनाऽनुभव-न्नोपेत्यरतिं रतिं वा यत् ॥९॥
शय्यापरीषहजयः स मुनेर्यच्च प्रतिक्रियाचरणम् ।
रोगेऽपि समयविधिना रोगपरीषहजयः स मतः ॥१०॥
प्राक्तनकर्मफलमिदं नैष तपस्वी करोति मे किमपि ।
बाध्यमनेन शरीरं न तु दर्शनदृक्चरित्राणि ॥११॥
इति वधकेऽप्यविकृतधी-र्निहन्यमानोऽपि मुद्गरशराद्यैः ।
समतां बिभर्त्ति यो वध-परीषहस्तेन विजितः स्यात् ॥१२॥
गच्छस्य तदितराणां परिभोगो ह्यशुषिरस्य दर्भादेः ।
समनुज्ञातस्तदुपरि शेते संस्तीर्य यो विधिना ॥१३॥
आस्तीर्य तृणं वा य-श्चौरहृतोपकरणे(णो) मुनिः शेते ।
तस्य तृणस्पर्शपरी-षहविजयस्तदधिसहनेन ॥१४॥
निःसङ्गस्य पवनवत् परिभावितबन्धमोक्षतत्त्वस्य ।
नवकल्पविहारकृतो विरुद्धमार्गं च परिहरतः ॥१५॥
यत्कण्टकादिदुःखे-ऽप्यस्मरणं यानवाहनादीनाम् ।
चर्यापरीषहजयः स मुनेः संयमरथस्थस्य ॥१६॥
आमरणादस्नान-व्रतभाजः स्वेदवलितमलराशेः ।
यन्मलपीडासहनं तदपनयननिर्विकल्पस्य ॥१७॥
स मलपरीषहविजयः कर्ममलापनयनाय बद्धमतेः ।
दर्शन-मो(?)बोध-चरित्रा-मलसलिलस्नानशुद्धस्य ॥१८॥
दंशग्रहणं घातक-सत्त्वसमूहोपलक्षणं तेन ।
दंशमशकादिदंशे-ऽप्यकुर्वतस्तद्वपुर्बाधाम् ॥१९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनिवारयतो व्यजना-दिना च ताननपगच्छतः स्थानात् ।
यत्तत्पीडासहनं दंशपरीषहजयः स मुनेः ॥२०॥

प्रज्ञाज्ञाने चाद्ये परीषहावष्टमे त्वलाभोत्थः ।
कर्मणि, चतुर्दशैते छद्मस्थानामरागाणाम् ॥२१॥

नहि सूक्ष्मसम्पराये परीषहाः केऽपि मोहनीयभवाः ।
इत्ययमरागमध्ये ग्राह्यो लोभांशसत्त्वेऽपि ॥२२॥

तत्राङ्गपूर्वतर्क-व्याकरणाध्यात्मशास्त्रनिपुणस्य ।
भानीवार्कस्य पुरो मम सर्वे निःप्रभा अन्ये ॥२३॥

इत्यस्य ज्ञानमद-स्याऽधिकपुरुषोनताधिया दलनम् ।
प्रज्ञापरीषहजयः साधोरध्यात्मशुद्धस्य ॥२४॥

सहमानोऽप्याक्षेपं योऽज्ञोऽपि सुदुःकरे रतस्तपसि ।
ज्ञानफलेऽविचिकित्सः सोऽज्ञानपरीषह(हं) जयः (जयति) ॥२५॥

योऽलाभेऽपि न दीनो लाभादपि वरमलाभमेव तपः ।
ध्यायति निरुत्सुकमतिः सोऽलाभपरीषहं जयति ॥२६॥

अष्ट निषद्या याञ्चा-क्रोशावरतिर्वशा च नग्नत्वम् ।
सत्कारोऽदर्शनमिति मोहाद् रागिष्वखिलसत्ता(:) ॥२७॥

भय-मान-क्रोधाऽरति-वेद-जुगुप्साश्च लोभ-दृग्मोहौ ।
क्रमतोऽष्ट हेतवोऽमी प्रोक्ताष्ट(?)परीषहोत्पत्तौ[1] ॥२८॥

अनुतिष्ठन्निजनियमं शून्यागारस्मशानशैलादौ ।
अभयो भैरवशब्दाद् भवति निषद्यापरीषहजित् ॥२९॥
निषीदन्त्यस्यामिति व्युतप्ता(त्पत्त्या) निषद्याशब्देनोपाश्रयो गृह्यते ॥

विधिनैव वा(या) चमान-स्तपोरतो दीनतादिपरिहारी ।
यो लाघवमदसोढा स भवति याञ्चापरीषहजित् ॥३०॥

शृण्वन् प्रभुरपि मिथ्या-दृशामवज्ञावचांस्यतिकटूनि ।
क्रोधांशमप्यकलय-न्नाक्रोशपरीषहं जयति ॥३१॥

---

१. "प्रोक्तास्तत्परिषहोत्पत्तौ" इत्येव यदि कल्प्यते, तदा सम्यक् स्यात् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विषमक्षेत्रादिकृता–मरतिं सूत्रोपदेशतो निघ्नन् ।
धर्मारामरतः सन् मुनिररतिपरीषहे (हं?) जयति ॥३२॥
एकान्ते नवयौवन–मदिरामदघूर्णमाननयनासु ।
दोर्मूलदर्शनोल्लस–दुन्नतकुचकलशलीलासु ॥३३॥
अशुचीनां पिण्डोऽसा–विति निर्मलभावनां दधत् कवचम् ।
विफलयति यः स्मरशरान् स संवृतः स्त्रीपरीषहजित् ॥३४॥
वासोभिरसर्वतनु–प्रावरणैरल्पमूल्यपरिजीर्णैः ।
नाग्न्यपरीषहसहनं भवति ममत्वोज्झितमुनीनाम् ॥३५॥
नन्वेवमौपचारिक–नाग्न्यात् तादृक् परीषहजयोऽपि ? ।
न, क्षुत्परीषहजयो–पमयाऽकल्प्याऽग्रहेऽदोषात् ॥३६॥
सत्कारो वस्त्राद्यै–र्नतिप्रशंसादिना पुरस्कारः ।
तदकरणे दुःप्रणिधानवर्जकस्तत्परीषहजित् ॥३७॥
पापस्थानेभ्योऽहं विरतो निस्सङ्गमार्गचारी च ।
तदपि सुरनारकादीन् न प्रेक्षे पुण्यपापभुजः ॥३८॥
तत् प्राचामतिशयगी–र्वृथेति दर्शनपरीषहो भावः ।
अशुभो भवेत् प्रदेशो–दितमिथ्यात्वप्रभावेन(ण) ॥३९॥
सोढयो(व्यो)ऽसौ नेहा–ऽभ्यायान्ति सुधाभुजः परमसुखिनः ।
जिन–गणधरादिविरहात् कार्याऽभावान्मनुजलोके ॥४०॥
प्राक्कृतदुरितनिगडिता निरन्तरं तीव्रवेदनाग्रस्ताः ।
गमनागमनाशक्ता न नारका अपि समायान्ति ॥४१॥
न च दुःखमानुभावात् संहननतपोविशेषवैकल्यात् ।
ज्ञानातिशयोऽस्त्यधुना स्थानस्थान् येन तान् पश्येत् ॥४२॥
प्राच्यां तूत्तमशक्तिः संहनन–तपो–धृतिप्रकर्षेण ।
आसीत् सर्वं तेषां घटमानं तदितिभावनया ॥४३॥
इति श्रेयः ॥

समाप्तमिदं बन्धहेतुभङ्गप्रकरणम् ॥ श्रीः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# શુદ્ધિપત્રક

## ભૂમિકામાં

| પૃષ્ઠ | પંક્તિ | અશુદ્ધ | શુદ્ધ |
|---|---|---|---|
| ૮ | ૨૭ | ૯ | ૧૨ |
| ૮ | ૨૭ | ૨૧ | ૩૧ |
| ૮ | ૨૯ | ચોથી | ૨૨ મી |
| ૮ | ૩૦ | ૧૧ | ૧૪–૧૫ |
| ૮ | ૩૦–૩૧ | ૧૫–૧૬ પંક્તિગત →← ચિહ્નાન્તર્ગત | બ્રેકેટમાં મૂકેલો |
| ૮ | ૩૨ | એ બે પંક્તિઓ | એ પંક્તિઓ |
| ૮ | ૩૨ | ૧૪ | ૧૯–૨૦ |
| ૯ | ૧ | '૨૪-૨૫-૨૬મી પંક્તિઓગત' એ અંશ રદ્દ સમજવો. | |
| ૯ | ૨ | ૨૧ | ૩૧ |
| ૯ | ૨ | ' છેલ્લેથી પહેલી પંક્તિમાં ' એ અંશ રદ્દ સમજવો | |
| ૯ | ૩ | ૧૭ | ૨૪ |
| ૯ | ૫ | ૬–૭ | ૪ |
| ૯ | ૯ | ૨૨ | ૩૧ |
| ૯ | ૩૦ | ૧૭ | ૨૩ |
| ૧૦ | ૧૨ | ૧૭ | ૨૪ |

## પુસ્તકમાં

| પૃષ્ઠ | પંક્તિ | અશુદ્ધ | શુદ્ધ |
|---|---|---|---|
| ૭ | ૯ | गुण्यते | गुण्येते |
| ૯ | ૪ | यदा | यद्वा |
| ૯ | ૧૨ | न्थि | न्धि |
| ૧૧ | ૧૮ | त्रिभिवर्दै | त्रिभिवे दै |
| ૧૨ | ૧૮ | सर्घ | सर्व |
| ૧૩ | ૨૨ | कायक | काय |
| ૧૯ | ૧૯ | एव | यद्वा |
| ૨૦ | ૧૦ | चतुष्ट | चतुष्टय |
| ૨૦ | ૩૪ | युग | युगल |
| ૨૩ | ૧૩ | " षट् पञ्चदश-विंशति-पञ्चदश-षडेक "એમ વાંચવું | |
| ૨૪ | ૩ | सभ्यग्दृष्टे | सम्यग्दृष्टे |
| ૨૭ | ૨૧ | दपर्याप्त | रपर्याप्त |
| ૨૮ | ૨૪ | जघत्य | जघन्य |
| ૩૦ | ૩ | रिकामन्यतमो | रिकाणामन्यतमो |
| ૩૪ | ૬ | विघिना | विधिना |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

સારદ સાર દયા કરો
આપો વચન - સુરંગ
તું તૂઠી મુજ ઉપરે
જાપ કરત ઉપગંગ

-વાચક "જશ"

Jain Education International For Private & Personal Use Only www.jainelibrary.org